ङ्गै मातृका च तथा विद्यात् स्वरव्यंजनभेदतः॥९॥ अधः पृष्ठं च चंद्रः स्यादूर्ध्वो ग्रे दिनकृद्भवेत्॥ श

रीरे पिकटेरूर्ध्वं चंद्रो घोर रविरीरितां॥१०॥ एवं सूर्यदशा प्रोक्ता बाह्याभ्यां चयशस्विनी॥ एकादश

विधौ चंद्र भास्करौ सम्प्रगीरितौ॥११॥ तयोश्चंद्राः प्रीतिकरा भास्कराः क्लेशकारिणः॥ राहुः सर्वत्र सर्व

जनाशाय भवति क्षणात्॥१२॥ अस्तीति वाक्यं च कुत्स्यान्नास्तीत्यक्तो रविः स्मृतः॥ शुक्लकृष्णौ तथा पक्षा

विति चंद्राद्दशान्तराः॥१३॥ सूर्येषु शस्तः सर्वत्र मृधा भोजन मैथुनेः॥ संग्रहश्चान्यदखिलं चंद्रे सिद्ध्य

त्ययत्नतः॥१४॥ जीवेषु कथितं तथ्यमेष्यदर्थश्च सिद्ध्यति॥ निश्चितं भवतीत्यक्तमन्यथा वेतदन्यथा॥

सर्वकार्येषु ... मंगलसूर्यः ... जीवः ... राम १५२

१५॥ अनिष्ठिते विधौ कन्या गर्भप्रस्ते न्यतः पुमान्॥ शून्ये गर्भे विपत्तिः स्यादित्याघूह्य वदेद्बुधं॥१६
शून्ये नम्नसिराहो च शुभान्येवाशुभान्यपि॥ शुभानि तत्र सर्वाणि नश्यंति परमेश्वरि॥१७॥ वामेव
हति वायौ गुर्वादेदेशिकशिष्ययोः॥ तत्स्थाने स्थापयित्वा तं तत्कार्यं क्रियये न्मनुं॥१८॥ अथवा जीव
त४ गस्थाने स्वकार्यं मंत्रमादिशेत्॥ अन्यथा शून्यराक्रोशस्तु नाशाय गुरुशिष्ययोः॥१९॥ षष्ठ्यायुते स्त्रि
शते निःश्वासे नाडिका मता॥ तासां षष्ट्यादिने पूर्णे तद्दिने स्यात्पुनः पुनः॥२०॥ एकस्मिंस्तद्दिने श्वासा
सहस्राण्येकविंशति॥ शिव तं च ततस्तेषां स्वरूपं शृणु सुंदरि॥२१॥ आरभ्यार्कोदयं प्रातः सपत्न्या द्विशतं
क्रमात्॥ प्राणाग्नीलां तु रवा निस्सुर्न्नवत्या च्यत्र संक्रमः॥२२॥ तत्राप्येवमतोन्यत्राप्येवं पंचदश क्रमात्
॥ दिनमेकं व्रजेदादौ दर्शप्रतिपदं प्रति॥२३॥ एवं क्रमेण तासं सर्वेषां प्राणोदय उदीरितं॥ एतत्क्रमविपर्या-

प्र६३

पूर्वकाम ... ता यो: पुष्ट योः ज्ञातारारम्य सप्तत्याधिकद्विशतश्वासैस्य पा एकैकस्य भूतास्य उ
दय उक्तः तत्र एकैकस्य भूतस्य सप्तत्याधिकाद्विशतसंख्याकश्वासेषु सार्धद्वाविंशतिसंख्याक

तं·ज १५३ सादभ्यानि भवंति हि ॥२४॥ वलाधिका स्वरा वामे वलिनो दक्षिणे स्थिराः । उभयत्रोभयात्मानः स्व श्वासैः
भा शुभपरीक्षणे ॥२५॥ सार्धद्वाविंशति श्वाससंक्रमाद्द्वादशराशयः । तत्र सार्धचतुष्कोणाभूतानि स्यु द्वादशरा
रिति क्रमात् ॥२६॥ घटिकार्धेषु सर्वत्र ध्याद्वाद्येकांतरोदये ॥ तत्तदर्णभवाः श्वासाः षष्ठ्या त्रिंशत शयो भवं
मीरितम् ॥२७॥ तेषु तत्तत्वर्णानां दशानामादितो दश । सप्ताष्टस्यात्ततः शेषैः प्राणैर्मीलां तु खादिरे
॥ संख्याभिर्वासनीयाभिः श्वासानां शृणु सुंदरि । यया विदितया मंत्री सदा भजन नवा [illegible] त ॥२८॥ नि
त्या तत्वात्रिविद्यानां संख्यास्युः पूर्वमेकशः । ततो दिनार्णाः संध्यास्तु स्तत स्व घटिकार्णिकाः ॥३०॥
१५२ राशयो द्वादश ततो ग्रहा हूतानि पंचवै । मातृकायापि पंचाशच्छीवक्रांत्यः ॥३१॥ सैकानवतयः प्रोक्ता दे १५३
वी सर्वात्मना स्थिताः ॥ एवं विधा वासनायो भावयेत्स महेश्वरः ॥३२॥ नाडीचक्रं च मर्माणि देहांतर्मस

... सार्धद्वाविंशतानी द्वादशभिः ... सप्तत्याधिकद्विशतश्वासाः भवंति तत्र एकस्य
राशेः सार्धद्वाविंशतिश्वासेषु ... सप्तत्याधिकद्विशतश्वासा भवंति
पश्वासैः सार्धद्वाविंशतिश्वासाः भवंति

तोक्रियाः। योगाभ्यासं तदंगैश्च स्वेच्छोत्क्रांतिविधानकं॥ ३३॥ परकायप्रवेशंच योगसिद्धस्यल
क्षणम्॥ आसन्नमृत्युफलविज्ञानिक कथयामि यथाक्रमं॥ ३४॥ प्राक्प्रोक्तमूलाधारस्थमध्यस्थत्र
स्नमध्यतः। सुषुम्ना पृष्ठवंशाख्यवीणादंडस्य मध्यगा॥ ३५॥ मूर्द्ध्नि ब्रह्मरंध्रांतानासाग्राद्द्वादशां
गुले तदाग्रात्सा युगा प्रोक्ता लंबुषाख्या तु नाडिका॥ ३६॥ अग्रादुत्थिता नाडी कुक्कुनामधा स्रा ४
जांतिका। तद्वामदक्षपार्श्वस्थास विश्वोदरवारुणा॥ ३७॥ जठरांता सर्वगा वा प्रोक्ते तद्वदनांतरा
हस्तिजिह्वा यशस्विन्यौ तन्नदंगुष्ठगे पदोः॥ ३८॥ तथैवेडापिंगले च नासारंध्रद्वयांतगे॥ गांधारी
च तथा पूषा नेत्रद्वयगते क्रमात्॥ ३९॥ तथा कर्णांगते शंखपयस्विन्यौ क्रमेण वै॥ सरस्वती तु या
नाडी साँ जिह्वाग्रगामिनी॥ ४०॥ एवं चतुर्दश प्रोक्ता नाड्यो देहे प्रधानकाः। तासां संधिषु तत्त्वं विवेच
नु

तं·ज· नाड्यस्थितास्तनौ॥४१॥तासांप्रधाननाडीनांसंख्यासार्धत्रिलक्षकं॥अप्रधानाःशिरादेहेत्वसंख्या
१५४ याभिरेववै॥४२॥वेष्टितेंङ्गैर्नरःसर्वैःस्वकीयैरिच्छयानिशांनाडयःसुषिरारक्तंमरुत्पूर्णाश्चसर्वगा
ः॥४३॥सुषुम्नामध्यगावज्रनाडीतन्मध्यगापरा॥चित्राभिधानातन्मध्येस्थितासाकुंडलीपरा॥४४
मर्मण्यंगुष्ठगुल्फांघ्रिपृष्ठजंघाख्यजानुषु॥ऊरुसीवनिकामुष्कमेढ्रनाभिषुपार्श्वयोः॥४५॥हृ
154 दयेस्तनकंठांसक्ककाटीकाग्रमूर्धसुशीखयोःफालनासादिमध्यांतास्याकपोलतः॥४६॥अष्टात्रिं
शदितिप्रोक्तान्येषुवायोस्तुधारणात्॥परकायप्रवेशश्चस्वेच्छोत्क्रांतिश्चसिध्यति॥४७॥दशानाम
पिवायूनांदेहस्थानांकथ्यांशृणु॥ऊर्ध्वाधोगमनासक्तौप्राणापानौसदातनौ॥४८॥नागउद्गारकृत्प्रो राम
क्तःक्षुतकृत्कृकरस्तथादेवदत्तोजृंभणात्कृतखकृच्चधनंजयः॥कूर्मउन्मेषकृत्प्रोक्तउदानोपितथा १५४

द्विकृत्। समानवायुः कायाग्निं संधुक्षयति पावितुं ॥५०॥ ध्यानाख्योरसमादाय ध्यापायदखिलं
तनुं ॥ एषां दशानामंशास्तु मारुताः स्युरनंतकाः ॥५१॥ तेषां प्रसादाद्देहस्य समीचीनास्थितिर्भवेत्
।वैलोम्ये विकृतां गत्वाल्लोके ह्रीसाय कल्पते ॥५२॥ जीवात्मा भेदरूपेण मनसा परमात्मनः ॥ योगो
योगस्तु विज्ञेयस्तस्यांगान्यष्टवैक्रमात् ॥५३॥ यमोथ नियमः पश्चादासनं तंतरं ॥ प्राणायामस्तथा प्रत्या नदनं४
हारस्तदनु धारणां ॥५४॥ ध्यानं समाधिरित्युक्ता व्यष्टांगानि यथाक्रमम् ॥ कथयामि शृणु प्राज्ञे
येमर्त्यो मत्समो भवेत् ॥५५॥ आत्मा परोक्ष प्रत्यूहकर्मगस्तु यमोयमः ॥ तथैकादशरूपः स्यान्नि
यमः परिकीर्तितः ॥५६॥ अहिंसा सत्यमास्तिक्यमार्जवं समता धृतिः । क्षमा दया त्रिधा शौचं संतो
षो गुरुसेवनं ॥५७॥ तत्रांत्यूहाः षडाख्याताः कामक्रोधौ ततस्तथा । लोभमोहौ मानमदौ वह्निव

त्सर्वनाशकाः। पद्मस्वस्तिकवीराख्यभद्राण्युक्तानि वै क्रमात्॥ आसनानि मनःस्थैर्यकारणोसाध
कानि वै॥ ५९॥ ऊर्वोरुपरि विन्यस्य ह्यत्यस्येत्यादयोस्तले। वामस्य पार्श्वद्वयस्पर्शान्नित्यपद्मासनमी
रितं॥ ६०॥ तथा तयोरधोभागे दंतः पार्श्वसंगमान्नास्वस्तिकाकारतः प्रोक्तं तदासनमितीश्वरि॥ ६१॥
ह्यत्यस्ततलयोरर्धसंस्पर्शाद्गुह्यजंघयोः। पादयोर्जानुदेशे वै वीराख्यं योगपद्धतः॥ ६२॥ तलांतःपा
र्श्वगं कुर्यादेकमन्यं तु वा ह्यगं। ऊर्वीरधस्तयोर्धैर्यविद्धि ह्या भद्रासनं स्मृतं॥ ६३॥ प्राणायामः त्रिधा
प्रोक्त उत्तमाधममध्यतः। लाघवो भूतलत्यागउत्तमे चित्तनिर्वृत॥ ६४॥ सर्वांगस्वेदसंदृष्टिरधमे
मध्यमे तथा· सर्वांगकंपनं प्रोक्तं मध्यासात्कालसंयुतात्। ति प्युत्तमगुणो भूयस्त्र्यभ्यासात्कालयोगतः।
तस्मात्समभ्यसेत्प्राणं स्नायं च नियमेन वै। वामेन नासारंध्रेण पूरयेदमृतात्मना। स्मरन्बीजमरुत्यश्वात्

दक्षिणानापसारयेत्॥६५॥ एवं सुसाधिते पश्चात् द्वात्रिंशन्मात्रया हरेत्॥ धारयेन्नच्चतुःषष्ट्या रेच
येन्नतुरीयते॥६६॥ कंपश्च पुलकानंदो वैमल्यस्थैर्यलाघवाः॥ तद्वत्कांतिप्रकाशौ च योगसिद्धस्य लक्ष
णम्॥६७॥ मूलाधारे मनः कृत्वा वायुमापूर्य मूलतः। नाडीचक्रांतरं नीत्वा सर्वांगीनि च वारयेत्॥६८॥
एवं संसाधिते वायावष्टत्रिंशत्सु मर्मसु। धारयन्वारयेदिच्छावशो नांगानि सर्वतः॥६९॥ तथाधारगतं कृ
त्वा मनः पवनसंयुतं॥ रसांबुदाहयाप्तस्वैः सहंसै र्दीपयेन्नतुं। एवं तैरक्षरैर्देहे वायुना तन्मयीकृते। त्रिका
लज्ञो विशुद्धात्मा सुखी जीवेच्चिरं भुवि॥७१॥ स्वेच्छाचारी व्योमगश्च व्रजेद्वै वैश्वसंगमं। स्वेच्छया देह
मध्यस्थः क्रीडन् गृहगतो यथा॥७२॥ एवं संसिद्धयोगस्तु स्वेच्छया देहमात्मनः। प्राणानारुध्य मध्यस्थ
ः क्रीडा गृहगतो यथा॥७४॥ एवं संसिद्धयोगस्तु स्वेच्छया देहमात्मनः। प्राणानारुध्य मध्यस्थसुषुम्नां

ब्रतस्तथा॥ब्रह्मरंध्राद्धि निर्गत्य भूयात्सर्वात्मनात्मवान्॥अथ वीतरसंप्रोक्तं चूर्णास्वादनतावशी॥७६॥
विरक्तचित्तः स्वदेहान्ते नोद्यायेन संत्यजेत्॥स्वेच्छाक्रांतिरिति प्रोक्ता योगयुक्तात्मनां प्रिये॥७७॥प्रको
पप्रवेशं तु वक्ष्ये देवि महाद्भुतं॥कालेतिदुःशकं प्रायो मर्त्यैःसर्वैरपीश्वरि॥७८॥अक्लेशतः परित्यक्त
प्राणास्वकतनुं तथा।परिपूर्णांगसंयुक्तामथ तो वीक्ष्य योगतः॥७९॥प्रविशेत्तु नतनु प्राणाप्रति प्रोक्तवि
धानतः।स्वां तनुं गोपयेत्स्वीयैस्तत्स्थां च तथा व्रजेत्॥८०॥सिद्धस्य लक्षणान्यष्टौ योगाभ्यासेन सर्वदा।शृ
णु तानि महादेवि येरन्यैर्ज्ञायते गुणैः॥८१॥द्वंद्वहा निःसुखावाप्तिरारोग्यं वश्यहन्तिता।जितेंद्रियत्वमक्रो
धः कृपया जनमोचिता॥८२॥आसन्नमृत्योश्चिह्नानि कथयामि शृणु प्रिये॥येः साध्यसाधके ज्ञात्वा देहत्या
गमतन्द्रिते॥८३॥देवतास्वात्मभजनपरो स्यां तां ततस्ततो॥सुगतिं प्राप्स्यसि ह्येतु भवतो जातमात्रतः॥८४

अरुंधतीध्रुवंघ्योस्त्रिनेक्तते चेतदर्धतः॥ हृशानासांतिकाक्रांत्याचंद्रकेपांगयोर्नरेत्॥८५॥ विलोक
यतितस्यार्धमृतिमेतिस्फानिश्चितं। गुल्फाद्यः स्फुरणानाड्योः पादयोः श्चेन्नजायते॥८६॥ अकारणं
निजांपूर्वांविमुच्यप्रकृतिंनरः। समाश्रयेततत्स्त्वष्ट्वा मृतिस्तस्यसुनिश्चिता॥८७॥ तस्याश्चनाशोगदि
तोभानौरुंडंचपश्यतः। निरुद्धकार्णरिंध्रस्य नचेत्कुंडलिनीध्वनिः। धूमोवादृश्यते मूर्ध्नियदिहृत्केत्वादितोपि
वा। मूर्ध्निवाविहगालीनासन्नंपरासुंनकोवदेत्॥८९॥ पश्चात्कृताकींगंडूषेनपश्येच्छुक्रंचापकं॥ सद्यःप
रासुमात्मानंजानीयात्सर्वथानरः॥ मस्तकस्यकरःपश्यन्प्रकोष्ठंस्थूलमात्मनः॥ अंगुल्योरंतराहृश्यांप
श्येन्नातोविनश्यतः॥९१॥ स्नेष्मशुक्रमलानिस्युर्निमग्नानिजलेयदा॥ तस्मिन्पक्षेप्रयात्येवयमसंस्त्य
क्तजीवितः॥९२॥ हाटकप्रतिमांपश्यन्ध्रुवंयातियमालयं॥ भास्करंभगणैःपश्यं ॅ पियातियमालयं॥
न्तो१

तं ज
१५७

157

९३॥ जलादिषु तनुच्छायां विकृतां वीक्ष्य मासतः॥ प्रयाति निधनं छिद्रं पश्यन्भानोश्च मंडले॥ ९४॥ स्ना
तानुलिप्तगात्रस्य पूर्वं शुष्यति चेद्धुरः। स पक्षान्प्रयाति निधनं सर्वैरपि सुरक्षितः॥ ९५॥ गुरुमात्मगणा
न्विप्रान्वंद्यस्त्रियी च देवताः। आस्तिकान्सततं निंदन्नकारणात एव वा॥ ९६॥ स्वाश्चीवेरस्य दलनेप
रित्यागे स्वरोषतः। गुरुमंत्रवह्निजत्यागे प्यचिराज्जायते मृतिः॥ ९७॥ गुरुं विद्यां च जनकं जननीं सर्वदेव
ताः। सदाधिक्षेपशीलाभ्यां न्यक्कुर्वन्नाशु नश्यति। पुस्तकं निजगेहं वा विष्टरं शयनं तु वा। निःकारणं नि
राकुर्वन्नाशु नश्यति मानवः॥ ९९॥ दृष्ट्वे हव क्रावाणीं नावैवर्ण्यं मासतो मृतिः॥ ध्याने स्वदेहवैरूप्ये मा
सतो निधनं भवेत्॥ १००॥ कालतत्वमयी ह्याप्तिरिति सम्यक्समीरिता। अस्या निःफालना चित्ते तत्तत्वं राम
स्वात्मसात्कृतं॥ १०१॥ ॥ इति श्रीषोडशनित्यातंत्रेषु श्रीकादिमते सप्तविंशः पटलः॥ ॥ अथ षोडश १५७

नित्यानां लोकात्मत्वं वदामि ते। य[न्]मयं विश्वमखिलं वर्तते सचराचरं ॥१॥ कालमातृकयोर्द्वाभ्निः
प्रागेवोक्तामयातत्वावाच्यवाचकयोगेन मातृकालोकयोरपि ॥२॥ द्याभिमद्यप्रवक्ष्यामि सम्यक्कोका
ललोकयोः। यदायत्तमिदं विश्वं नित्यास्तत्कालविग्रहाः ॥३॥ कालस्य षोडशाकारो रूपो दृश्यत ए
वहि। दृद्धिकृयाध्यावं इस्य श्राद्ध्ययाकलयातथा ॥४॥ लोकरूपं तत्प्रमाणं कालचक्रं च तादृशं ॥ तयो
रन्योन्यनित्यत्वध्यातिं तद्वत् स्थितिं तयोः ॥५॥ नित्यालोकस्थितिं मानं तासां कवचविग्रहं ॥ ग्रहाणां मा
तृकारूपं स्पृणु प्रोक्तं क्रमेणवै ॥६॥ हेमरूपो भुवो मध्ये मेरुस्तिष्ठति पर्वतः। तस्याभितो मही पार्श्वे पंचाश
त्कृतयोजना। लवणेक्षुसुरासर्पिर्दधिक्षीरजलात्मभिः। सिंधुभिः सप्तभिर्द्वीपैस्तत्संख्यैर्द्विगुणोत्तरैः
॥७॥ आवृतां बाह्यसलिलजलधेर्बाह्यपार्श्वयोः ॥ मध्यविस्तारमानेन तु वहिरावृत्य तत्सुनः ॥८॥ काल

रि३

त·ज चक्रंपराशक्तिमास्तेनसदैवतु।।तुन्नंपरिभ्रमत्येवपश्चिमाधोपसव्यतः।।१०।।तच्चतन्मानवीथी
१५८ भिर्युतमष्टभिरद्भुतैः।।तेजोमयैर्द्वादशारैर्युक्तंमेषादिविग्रहैः।।११।।तेषुवीथीषुपूर्वाशामुखास्ते
नवग्रहाः स्थिताः।।राशिषूक्तेषुकालेनचोक्तेनपर्यस्तया।।१२।।प्रयांतितेषांवारेणलोकानांभवति
स्थितिः।मध्यस्थमेरौललितासदेवास्तेमहाद्युतिः।।१३।।तस्याभितोजल ताःशेषास्ताःस्युश्चतुर्द ललि४
158 श।।तद्बहिःपरमेष्ठ्योन्निरवंताविद्यानुसंस्थिता।।१४।।कृतादिवर्षादारभ्यप्रतिवर्षमितिस्थिताः।।द्विती
यादिषुवर्षेषुक्रमतःपरिवृत्तिभिः।षोडशेष्वेपरेष्योन्निललितासलिलांबुधौ।।विद्याचभवतीस्थाहिभजं
×चान्द्रेषु२ तेपरिवर्तनं।एवंयुगेषुवर्तंतिप्राक्रूपतः।कालेष्वपिचमध्यादिपरयोमांतमीश्वरि।।१७।।परिवृत्तिंभजं राम
तेतांमध्यस्थास्तांशतश्चरेत।अन्याःसर्वास्तिवतत्रचरंतिस्वयमेववै।।१८।।तथाकालक्रमात्तास्तत्तजं १५८

तेपरिवर्तनं। कालतोदेशतश्चक्राद्वैक्यंसंजायतेयदा॥१९॥तदाभवंतिभूपालाधार्मिकाःकालवर्षित
ाःप्रजाश्चसुखिनोभूमुररोगाःकालमृत्यवः॥२०॥कालचक्रस्यवाह्यस्थविष्यांतिष्टतितारकाः। तद्बहि
ःपरमव्योमस्थितिस्तत्रतदंतिका॥२१॥तासामपिचनित्यानांषोडशानांचतत्क्रमात्॥एवंदेशंचकालंच
तन्मयंसमुदीरितं॥२२॥देशवर्षतिथीनांचसंपातादैक्यमागतां। पूजयेत्सविशेषंतांप्रजपेच्चाखिला
न्वये॥२३॥तेषुविद्योपदेशान्तुतस्यास्तत्संनिधिर्भवेत्॥महाशक्तिश्चजायेतत्रयाणामैक्यवैभवात्॥२४
॥कालप्राधान्याययजेत्स्वाब्दजन्मवासरकेतुतां। देशप्राधान्यान्तुतन्मासपूर्णायांपूजयेच्छिवे॥२५॥प्रत्यब्दमेवं
कुर्वाणांनमुंवतिरमायशः॥कदाचिदपिदीर्घायुररोगोज्ञानवान्सुखी॥२६॥राजभिर्मनुजैःस्त्रीभि
रन्यैःप्राणिभिरप्यसौ। मान्यतेसर्वमित्राश्चसिद्धास्युस्तत्रपूजनात्॥२७॥जंबूप्लक्षःशाल्मलीचकुशक्रौं

तं॰ उ ञो यथाक्रमं॥ शाकश्च पुष्करश्चेति सप्तद्वीपेव भूरुहः॥ २८॥ तेषां नामभिरेव स्युस्तत्तन्नामानि तन्मुखा
१५९ न्॥ तत्तन्नामभिरभ्यर्च्य तद्द्वीपं तत्र पूजयेत्॥ २९॥ तांतां नित्यां तत्र तत्र काले काले तु साधकः॥ एवं पूज
यितुर्लोके न समोस्ति न चाधिकः॥ ३०॥ मध्ये भूमिं तामभितः कालचक्रं ततो वहिः॥ महाव्योमध्वनिः सीमंत व॰ ३
स्तेतद्द्वयसंस्थितिः॥ ३१॥ सुस्थिरायां भुवो मध्ये चक्रस्य भ्रमतो निशं॥ ग्रहाणां मेत्र संवासः प्रचारनियता
159 त्मनां॥ ३२॥ कारणं परमेशानि तवेच्छैव तु केवलं॥ तत्वत्यद्वलवायतयोः कुत्रापि विद्यते॥ तयोर्वहिः पर
मव्योम्नि क्वाविदस्ति चतुष्टयं॥ प्रागुक्तरूपां तत्तीरे कोलवक्त्रां तु पंचमीं॥ ३४॥ सलिले कुरुकुल्लां च पोताद्रू
ढां सुविस्मितां॥ तन्मध्ये नवरत्नाख्यमहाद्वीपं च तत्र वै॥ ३५॥ कल्पकोद्यानमृतुभिः षड्भिः सेवितविग्रहं
॥ तन्मध्ये संख्यनृपाभिर्वृतां संगीतशक्तिभिः॥ ३६॥ गीतवादित्रनृत्तादिसंसक्ताभिरनारतं॥ विनोद्यमा राम
१५९

नां विलसन्मदमंथरवीक्षणाम्॥ रत्नमंडपमध्यस्थरत्नसिंहासनोपरि॥ सुविस्मितां शक्तिवृंदगीता
कर्णननंदितां॥ ३८॥ स्वहजात्मवसंभोगैः संजातानंदविग्रहां॥ दयामदारुणापांगविलोकितसुसा
धकां॥ ३९॥ परितो भूषणौघैश्चित्रैः कर्णचामरकादिभिः॥ विराजमानानूद्दिरद्दानश्वानपितथाविधान्
४०॥ शक्तिभिर्दर्शितानन्नेपश्यंतीममितोत्सवाम्॥ स्वसमानाभिरभितो नित्याभिः सेवितां तथा॥ ४१॥
प्रयाति तां संपूजयित्वा तत्समाकारतां शनैः॥ तद्दिनोदस्तत्समीपनिवासी स्यात्स निश्चितम्॥ ४२॥ को
टियोजनविस्तीर्णसमायाममहाद्भुतं॥ नवरत्नमयं द्वीपं तन्मानाब्धिभिरावृतं॥ ४३॥ तन्वृतीयांशमान
स्यसहस्रादित्यतेजसः॥ रत्नद्वीपस्यमध्यस्थवृतीयांशेन तु मंडपे॥ ४४॥ कोट्यादित्यद्युतिप्रांते ष्टभितोऽ
संख्यशक्तिभिः॥ तथासमन्वितां ध्यायन्नरो भवति मत्समः॥ ४५॥ एवं ध्यात्वार्चयेद्देवीं भक्त्या परमयो क्त

सं॰ ज॰
१६०
पावनं

था॥ नरो निरस्तसंसारमूलाज्ञानो जितेन्द्रियः॥४६॥ निपुणाश्वकलादक्षः सुखी निःसंगवित्तवान्
॥ अपापः पुण्यशीलश्च सत्यार्जवसमन्वितं॥४७॥ देशिकः स्वकुलोत्तुंगः सर्वसंभावितात्मवान्॥ जाय
ते तस्य परितो योजनं भवेत्॥४८॥ तद्दालोकनसंलापसंस्पर्शादिकृतां नृणां। पापकर्मक्रियात्तेन रक्षि
तास्युश्च तत्समाः॥ कालचक्रस्य नित्याया लोकस्य च बहिः स्थितां ध्योमरूपमनाद्यां तं यन्नचिन्मयमा
वयोः॥५०॥ यो वेत्त्येएवमशेषं तु नित्यावैभवमीरितं। स जीवन्मुक्त एवेति प्रोक्तं लक्षणं च ते॥५१॥ समस्ता
पद्विमुक्त्यर्थं सर्वसंपदवाप्तये॥ भूतप्रेतपिशाचादिपीडाशांत्यै सुखाप्तये॥५२॥ समस्तरोगनाशाय समम
रे विजयाय च॥ चोरसिंहद्वीपिगजगवलादि तयानके॥५३॥ अरण्ये शैलगहने मार्गे दुर्भिक्षके तथा
। सलिलाग्निमस्तपीडास्व ऽब्धौ पोतादिसंकटे॥५४॥ प्रजप्य नित्याकवचं संस्कृतं सर्वं तरत्यसौ॥ सुखी जी

राम
१६०

160

वतिनि ईंद्दोनिःसपत्नो जितेन्द्रियः॥५५॥शृणु तत्कवचं देवि वक्ष्ये तत्वात्मकं॥येनाहमपि युद्दे
षु देवासुरजयी सदा॥५६॥सर्वतः सर्वदात्मानं ललिता पातु सर्वगा।कामेशी पुरतः पातु भगमाला त्व
नंतरं॥५७॥दिशं पातु तथा दक्षपार्श्वं मे पातु सर्वदा॥नित्याक्लिन्नाथ मे रुंडां दिशं पातु सदा मम॥५८
तथैव पश्चिमं भागं रक्षेत्सा वह्निवासिनी।महावज्रेश्वरी रक्षेदनंतरदिशं सदा॥५९॥वामपार्श्वं सदा
पातु इतीमेत्वरिता ततः॥पालयेत्तु दिशं चान्यां रक्षेन्मां कुलसुन्दरी॥६०॥नित्या मां मूर्धतः पातु साधो
मे पातु सर्वदा॥नित्या नीलपताकाख्या विजया सर्वतश्च मां॥६१॥करौ तु मे मंगला नि सर्वदा सर्वमंगला।
देहेन्द्रियमनःप्राणान् ज्वालामालिनि विग्रहा॥६२॥पालयेदनिशं चित्रा चित्तं मे पातु सर्वदा।कामा
त्क्रोधात्तथा लोभान्मोहान्मानान्मदादपि॥६३॥पापान्मत्सरतः शोकात्संशयात्सर्वतः सदा।स्तैमित्या

तं॰ज॰ घसमुद्योगादशुभेषु तु कर्मसु॥६४॥ असत्या क्रूरचिंतातो हिंसातश्चौरतःस्तथा। रक्षंतु मां सर्वदाताः
१६१ कुर्वंति विघ्नं शुभेषु च॥ नित्याःषोडश मां पांतु गजारूढाः स्वशक्तिभिः। तथा हृदयसमारूढाः पांतु मां
161 सर्वतस्सदा॥६६॥ सिंहारूढास्तथा पांतु मांतरिक्षगता अपि। रथारूढाश्च मां पांतु सर्वतः सर्व
दारणे॥६७॥ तार्क्ष्यारूढाश्च मां पांतु तथा व्योमगतास्तथा। भूतगाः सर्वगाः पांतु मां सर्वत्र च स
र्वदा॥ भूतप्रेतपिशाचापस्मारकृत्यादिकान् ग्रहान्। द्रावयंतु स्वशक्तीनां भूषणैरायुधैर्मम॥ग
जाश्वद्वीपिपंचास्यतार्क्ष्यारूढाखिलायुधाः॥ असंख्याश्शक्तयो देव्याः पांतु मां सर्वतस्सदा॥७०॥
सायं प्रातर्जपेन्नित्याकवचं सर्वरक्षकं॥ कदाचिन्नाशुभं पश्येन्न शृणोति च मत्समः॥७१॥ ग्रहाणां मा राम
तृका विद्याविग्रहं विग्रहं यतः। तेन तेषां तु पूजार्थं वक्ष्ये तद्धाममंडलं॥ सुधाब्धिरै भवेद्विंदो मंडलं मा १६१

१ वरो +

स्कारस्यतु ॥ सुधाद्यं जनरूपं स्यादितरैर्मयायतः ॥ ७२ ॥ तेनैतेषां मंडलानि तेस्तैर्वदामि ते ॥ तेषां न
वानां पूजासु तन्मयं नवमंडलं ॥ ७३ ॥ चंद्रार्कयोः पृथक्पूजा स्वभ्यर्च्यं मंडलं तयोः ॥ क्रमेणाम्बुणु
देवेशि सर्वश्रेयस्करात्मकं ॥ ७४ ॥ प्राक्प्रत्यक् दक्षिणोदक्च तु सूत्रनिपातनात् ॥ त्रिहस्तमात्रे
जनयेन्नवकोष्ठानि तेषु वै ॥ ७५ ॥ मध्यप्राक्कोष्ठयोः कृत्वा पृष्ठत्रयमति स्फुटं ॥ तन्मध्ये तिर्यगूर्ध्वं च
सूत्रद्वयनिपातनात् ॥ ७६ ॥ विधाय नवधा मध्यमाशादि विलिखेत्क्रमात् । वातायष्टस्वरान्मध्ये प्रा
वं नमभसायुतं ॥ ७७ ॥ वृत्तत्रयी घ्योः स्वरोप्येतं नभस्तां मातृकां लिखेत् । तत्रार्कमर्चयेन्नस्यनाम निर्द्दिद
शोदितैः ॥ ७८ ॥ प्रणवाद्यैर्नमो मान्तैश्च भानोः सर्वत्र सर्वदा ॥ सोमस्याद्यं स संयुक्तं कृत्वा तेन तया चेय
नू ॥ ७९ ॥ तन्नामान्तत्र विलिखेत् विष्णुर्द्यं च स्वराष्टकं । कं षोडशस्वरयुतं मातृकां च स्वयोगतः ॥ ८० ॥

विन्याद्यं ककाराद्यं १ कं मकारः १

तं·ऊ विलिखेद्वृत्तयोर्मध्यें कोष्ठे पितं लिखेत्। दाहवह्निस्वसहितमर्चयेत्तत्रमंडले॥८१॥ सोममुक्तक्र
१६२ मेणैव प्रोक्तकालेषु सर्वदा। निवेद्य शर्करा दुग्ध पायसैश्चोपचारकैः॥८२॥ सप्तस्वन्येषु कोष्ठेषु
कृत्वा वृत्तत्रयं तथा। तत्र द्वर्गादि वर्णांश्च स्वरैस्तां मातृकामपि॥८३॥ विलिख्य मध्यं च तथा कृत्वा तेषु
४ख्या+ चतत्क्रमात्। तत्र द्वर्गाक्षराण्याद्यक्षरैरालिखेदपि॥८४॥ मध्ये प्रणावगर्भस्थं वर्गाद्यक्षरमालिखेत्॥
एवं कृते सु नवसु पूजयेच्च नवग्रहान्॥८५॥ अग्न्यादी शांतमभितो लिखेन्नामान्यनुक्रमात्। अर्कादी
162 णि चतुर्थ्यंतान्यर्चयेन्नैस्तुतानि तु॥८६॥ भौमं बुधं तथा सौरिं गुरुंस्तं राहुं च शुक्रकं॥ केतुमेतेस्तु सर्व
त्र मंत्रानुक्तौ च पूजनं॥८७॥ एवं नवग्रहाणां तु मंडलान्युदितानि वै॥ तेष्वेव तेषामर्चातस्ते कुर्युस्तदनु राम
ग्रहं॥८८॥ भास्करेंद्रोस्तु तद्वारद्वयेदर्शे च पूर्णिके॥ स्वाज्ञयोः स्थितयोः पूजा मंडलं स्पृणु पार्वति॥ १६२

८९।। विलिख्य वृत्तयुगलं तन्मध्ये तिर्यगूर्ध्वतः। रेखाभिरष्टभिर्मध्ये त्वेकाशीतिपदे लिखेत्।। ९०
ईशकोष्ठादिपरितः प्रवेशेनामृतार्णकान्मायांताशीतिसंख्यातान्मध्ये दावगतं च तत्।। ९१।। वृत्तयो
रंतरा कृत्वा मातृकां ग्रथितां च तैः।। पंचभिश्चालिखेत्तत्र बिंबे सोमं समर्चयेत्।। ९२।। कर्पूरचंदनाभ्यां
तदालिखेदिंदुबिंबकं।। रक्तचंदनसिंदूरगैरिकैश्चैकतो रवेः।। ९३।। कृत्वा बिंबं तत्र तं च पूजयेत्स्त्रो
क्तरूपतः।। द्विवृत्तान्तस्तिर्यगूर्ध्वाः कृत्वा रेखाः समांतराः।। ९४।। एकोनविंशतन्मध्ये चालिखेत्साग्वदी
नितान्।। प्राणादिकान्नभोंतान्स्कस्वैरूपेतान्स्वरैर्युतान्।। वृत्तयोरंतराले च पंचविंशतिवर्णकैः। स्वरोर्ध्वे भै० २
त्पवृत्तैर्वह्निदृशारोग्रथितां लिपिं।। ९५।। विलिख्य च शराकारं त्रिहस्तायामविस्तरं।। तन्मध्ये तानुमा
वाह्य पूजयेत्साग्वदीश्वरि।। ९६।। पीठे वा सुधया लिप्ते भूतले वा शिलातले। कुसुमेनाष्टते कृत्वा बिंबान्मु

तं. उ.
१६३

त्तानि पूजयेत्॥ ९८॥ एवं सर्वत्र तंत्रे स्मिन्नुक्त पूजा समीरिता। विशेषादेश रहिते तत्र क्रमतो र्चयेत्
॥ ९९॥ एवं ते देवि विद्यायाः कालदेशात्मतो हिता। सर्वात्मना सर्वदा च सैवार्च्या सर्व विग्रहा॥ १००
रागतत्वमयी व्याप्तिरिति सम्यक् समीरिता। अस्या निष्कालना च्चित्ते तत्तत्वं स्वात्मसात्कृतम्॥ १॥ ॥
इति षोडश नित्या तंत्रेषु श्रीकादिमते अष्टाविंशं पटलः॥ ॥ अथ षोडश नित्यानां होमाद्य विधिवच्छिवे
। प्राच्यादि दिग्विभागं च मंडपादेस्तु लक्षणं॥ १॥ कुंडानां स्थान निर्माणो नाभ्यो न्यादि लक्षणं॥ माना निप
नि तेषामग्नेस्तथा न जिह्वास्तदर्चनं॥ २॥ होमद्रव्याणि मानानि विशेषाणि कृत क्रियां। उपक्रमोपसं
हारौ फलानि च यथा क्रमं॥ ३॥ कथयामि शृणु प्राज्ञे येर्मंत्री सिद्धिमाप्नुयात्॥ यदि कुर्या न्यथा हृष्टं वि राम
पन्नो निरयं व्रजेन्न॥ ४॥ मानोगत्यादि शोज्ञात्वा कुर्यात्कर्माणि देशिकः॥ तज्ञत्यादि कुपरिज्ञानं शृणु वक्ष्ये १६३

163

यथाविधि ॥५॥ सुसमे भूतले कृत्वा हस्तं भ्रमणारूपतः ॥ तन्मध्ये विंदुमध्ये तु शंकुं संस्थाप्य तस्य वै द्वा
अग्रच्छायाव्ययवशाद्वृत्ते पूर्वापरद्वये पूर्वापराङ्कयोः कृत्वा चिह्नं तद्भितस्तथा ॥७॥ सममानपरिभ्रा भ्रा
त्या कृत्वा हस्तद्वयं पुनः ॥ तयोः संश्लेषसंजातमत्स्यात् दक्षोत्तरे स्थिते ॥८॥ संधिद्वयेन प्राक्प्रत्यक्सूत्रं म
ध्ये तु विन्यसेत् ॥ सूत्रं दक्षोत्तरं तेषां अग्रैः प्रागादि कल्पयेत् ॥९॥ राज्ञां होमाभिषेकादिप्रयोगार्थं तु मं
डपं ॥ विदध्यान्नवहस्तेन विस्तारायामसंयुतैः ॥१०॥ षोडशस्तंभसंयुक्तं चतुर्द्वारं सुतोरणं ॥ उदुंबरवटा
श्वत्थप्लक्षैर्वंदनमालया ॥११॥ पिहिताशेषकोणं च तत्त्रिभागैकमागतः ॥ विदध्यान्मध्यतो वेदिं करमात्र
समुन्नताम् ॥१२॥ दर्पणोदरसंकाशमध्यां तद्भितस्तथा ॥ प्रागादिदिक्षु कोणेषु व[illegible]दिषु च कल्पयेत् न्ह्या २
॥१३॥ कुंडान्यष्टौ च तेषां रूपं च नामकं ॥ निर्माणं सकलं वक्ष्ये यथाविधि तथानघे ॥१४॥ तुलाकुलीरमे

चतुष्कं २

वु

तं·ज षाणांमकरस्यदेशातः।विदध्याद्वृत्तकुंडानिचरराशिचतुष्टये॥१५॥वृषेसिंहेवृश्चिकेचकुंभेचस्थिररा
१६४ शिषु॥विदध्याच्चतुरस्राणिकुर्यात्कुंडान्यनुक्रमात्॥१६॥मिथुनेकन्यकायांचचापेमीनेक्रमेणवै
॥उभयात्मसुकुर्वीतयोनिकुंडानिमंगले॥१७॥अमंगलेषुकुर्वीतचरेष्वर्धशशांककं॥स्थिरेष्वपि
४ षडस्त्रेच त्रिकोणानिपरेषुन्तुचतुष्टये॥१८॥पंचास्त्रंचसप्तास्त्रंचाष्टकोणकं।एवंनवानांकुंडानांश्रृणुमानादि
लक्षणं॥१९॥मध्यमांगुलिमध्यस्यपर्वणः परिणाहतः॥तृतीयांशोभवेदत्रतंत्रेसर्वत्रचांगुलिः॥२०॥तै
164 श्चतुर्भिर्भवेद्धामः तन्मानात्स्यान्नरोन्नतिः॥षण्णवत्यंगुलास्सास्यात्तन्मानैःकुंडकल्पनं॥२२॥प्राक्प्रत्यक्
सूत्रमास्फाल्यतन्मध्येचिह्नकल्पनं॥कृत्वाततस्सूवतिःपश्चाद्द्वादशांगुलमानतः॥२३॥परंप्रमृज्यतत्रा राम
५न्मुष्टिर्वितस्तिस्तत्त्रिभिर्गुणैः।अरत्निस्तद्द्वयेनस्याद्धस्तस्तद्द्वयतःशिवे॥२१॥तद्द्वयंतुभवे ५ २ १६४

पिविदध्याद्विद्धयुग्मकं॥ प्राक्प्रत्यक्चिह्नमानेन तयोरेवावलंबतः॥२४॥ दक्षिणोत्तरतो हंसपदे

कृत्वा ततस्तयोः। प्रसार्य सूत्रं तत्राऽपि मार्जयित्वा क्रमानतः॥ २५॥ ततस्तद्ग्रयोर्लंघ्य मध्यविद्धस्य मा

नतः॥ कुर्याद्धंसपदं कोष्ठान्यभितस्तेषु पातयेत्॥२४॥ चतुष्टयं तु सूत्राणां चतुरस्रं भवेत्समं॥ तस्मि

न्नन्यानि कुंडानि वदामि वमानतः॥२५॥ तेषां प्रोक्तक्रमेणैव चरादिषु तु राशिषु॥ माननिर्माणयोर्वक्ष्ये

विधानं सुस्फुटं शिवे॥२६॥ तन्मध्याष्टादशांशेन प्राक्सूत्राग्रं विकाशयेत्॥ तिर्यक्सूत्राद्वहिस्तेन

मानेन भ्रमयेत्तथा॥२७॥ मध्यविद्धावलंबेन भवेत्तु वृत्तकुंडकं॥ चतुरस्राभितो या तु त्यक्ता भूः सान्य

तस्तथा॥२८॥ लभते सर्वकुंडेषु तेन सर्वाणि सर्वतः॥ तत्समान्येव जायंते षण्णवत्यंगुलात्मना॥२९॥

तन्मध्ये दशमांशं तु परित्यज्याथ ऊर्ध्वतः। शेषांशांशकमानेन तन्मध्याद्भ्रमयेत्तथा॥ ३०॥ अर्द्धचंद्रार्क

तं·ज· तिर्यन्न भवेत्कुंडं तदीरितं ॥ एतद्द्वयं पंचरा णांस्याद्राशीनां क्रमतः शिवे ॥ ३१ ॥ तस्यैव षष्ठमंशं
१६५ तु पार्श्वयोस्तु विकाशयेत् ॥ प्रत्येकं पश्चिमं सूत्रं तन्मानेनाथ सूत्रयोः ॥ ३२ ॥ विन्यासाद्ब्रह्मसूत्रांता
न्तद्दृग्मायावलंबनात् । कुंडं त्रिकोणमुद्दितं चतुर्षु स्थिरराशिषु ॥ ३३ ॥ तन्मध्यपंचमांशेन विकाश्य
ब्रह्मसूत्रकं ॥ पूर्वतः पश्चिमद्वंद्वकोष्ठयोर्मध्यदेशतः ॥ ३४ ॥ तत्कोणमानेन तथा भ्रामयेत्पश्चिमाग्र
165 कात् ॥ उत्तराग्रावधि तथा दक्षिणाग्रावधि प्रिये ॥ तन्मध्यतिर्यक्सूत्राग्रद्वयावष्टं
भतस्तथा ॥ विकाशितब्रह्मसूत्रावधिसूत्रद्वयं भवेत् ॥ ३६ ॥ योनिकुंडमिदं भद्रे स्याच्चतुर्षु तु यात्मसु ॥ भ ३
तार राशिषु प्रोक्तकल्याणाक्रमसूत्रार्थसिद्धिकृत् ॥ ३७ ॥ तन्मध्यसप्तमांशेन ब्रह्मसूत्रं विकाश्य तत् ॥ राम
मानेन परितो भ्रांत्या कृत्वाष्ट वृत्तं तथा ततः ॥ ३८ ॥ तेषामानान्तवृत्ते कृत्वा चिह्नानि तत्र वै पातयेत्पंचसू १६५

त्यं २

त्राणि तत्सर्वत्र्यंबकास्त्रकुंडकं ॥ ३९ ॥ तन्मध्ये षोडशांशेन विकाश्य ब्रह्मसूत्रकं ॥ तेन मानेन वर्तनं तथा कृ
त्वा वृत्तमतिस्फुटं ॥ ४० ॥ तद्वृत्ते वृत्तमध्यस्था कुर्यादर्धेन लांछनं ॥ तत्र षड्सूत्रपातेन भवेत्कुंडं षडस्रकं ॥ वांकनं-पा२
धा२ ॥ ४१ ॥ तन्मध्ये दशमांशेन विकाश्य ब्रह्मसूत्रकं ॥ तेन मानेन संप्राप्य कृत्वा वृत्तं ततस्ततः ॥ ४२ ॥ तच्च
तुःषष्टिभागेषु त्रयस्त्रिंशांशमानतः ॥ वृत्ते विधाय चिह्नानि सप्त सूत्राणि पातयेत् ॥ ४३ ॥ तत्सप्तास्र
भवेत्कुंडं चापगं वायुदिग्गतं ॥ समस्तवैरिनाशाय प्रोक्तं कुंडमिदं शिवे ॥ ४४ ॥ तन्मध्यस्य चतुर्विंश
मानेबाह्येपि पूर्ववत् ॥ विधाय चतुरस्रं तु पूर्वकोणाद्ईमानतः ॥ ४५ ॥ कोणाद्विभिन्न एवास्य कृत्वा चि
ह्नानि चाष्टवै । तेषु चिह्नेषु कृत्वाष्ट सूत्राणि परितः शिवे ॥ ४६ ॥ कुर्यादष्टास्रकं कुंडमेतेषां मेखलादि
कं ॥ प्रवक्ष्यामि शृणु प्राज्ञे समुद्दिष्टं क्रमेण वै ॥ ४७ ॥ वृत्तमध्ये भुवो मानं त्रिगुणं विभजेत्क्रमात् ॥

तं·ज· स्ववांछितेनमानेनतदश्नोतिमवंतिहि॥४८॥ एवंयंत्रादिषूक्तेषुषड्त्रिंषुविधिर्भवेत्॥ कुंडेषु शे २

१६६ चतथाकोटिहोमादिषुसमीरितम्॥४९॥ प्रोक्तेषन्यतमेकुंडेनवहस्तप्रमाणके। कारयेत्को

टिहोमंतुपुरुषैरष्टभिस्तथा॥५०॥ दिग्विदिक्कास्थ्यैकमात्यंचवासरैःसर्वसिद्धये॥ तेषांचदक्षिणां

दद्यात्स्वजात्युगाणतिपूर्वकं॥५१॥ गोकर्णाद्द्यमात्रांतुभुवंगांप्रस्कतस्तनीं॥ महिषींसप्रजामश्व

दाससदासीविभूषणाम्॥५२॥ वासांसिहेमतिंकाणंशतंतेषामध्येकशः॥ ततोगुरोश्चतान्येवतैःस

मानमुदीरितम्॥५३॥ दिव्योत्पातेषुरोगान्नौघोरेचरिपुनिग्रहे॥ तथादिग्विजयेचान्यस्यपरकृत्यादि राम

संभवे॥५४॥ कारयेत्कोटिहोमंतुविद्यया नित्यया न्यया। स्वरूपवेषशीलैश्च नित्याभक्तैस्तयास्ति १६६

के॥५५॥ प्रोक्तानांसर्वकुंडानामरत्निःखातमात्रकाम्॥ कोटिहोमस्यकुंडस्यखातमर्धंवितस्त्यवै॥५६

द्या २

स्त्य

सर्वेषांमेखलामानं वितस्त्यष्टतदर्धकैः।। विस्तारोत्सेधयोः कुर्याद्योनिर्हेत्रासनाग्रतः।।५७।।महाकुं
डस्य तु पुनः मेखला हस्तमानतः।। तिसृणामपि विस्तारः प्रत्येकं षोडशांगुलाः।।५८।। तेषामुत्सेधसंख्या
च षोडश स्युः क्रमेण वै। योनिर्निर्माणमधुना वासनां च शृणु प्रिये।।५९।। बहिष्ठमेखलामध्या दारभ्य नि
जनालकां।। वितस्तिमात्रकारश्वाम श्वत्थदलसन्निभां।। ६०।। वितस्त्यायामसंयुक्तां तदर्धेन च विस्तृतां।। ए
कांगुलोत्सेधयुतां मेखलोपरि सर्वतः।। मूलान्निम्नाग्रकां स्तोकं कुर्याद्योनिं वसर्वतः।। योनिः कारणभूत
स्य तत्वस्यस्यात्पदं महत्।। ६२ ।। तेन तत्रैव हृद्यानां निधानात्तन्मयत्वतः।। फलानि पूर्णान्यचिराद्दयत्ना
द्धितरत्यसौ।। ६३।। अष्टच्छदं सरोजं तु विदध्याद्बाह्यविग्रहं।। चतुर्भिरंगुलैः कुर्यात्कर्णिकां दलमेव च
।।६४।।महाकुंडस्य चैवं तु कुर्यान्मानं समूहतः।। नाभिं कुर्यात्तु सर्वत्र कुंडमध्ये विधानतः।। ६५।। विस्तारा

६६
हेन तत्तथा। ध्यानमग्ने द्विधा प्रोक्तं सौम्यक्रौर्यविभागतः। सौम्यं नि + १

०

त. ज दपि वोत्सेधं षड्भिः षड्भिरुदीरितं॥ प्राग्वन्महति कुंडे च कुर्याद्धृत्वा समाकारं ध्यानमन्यच्छृणु प्रिये॥ ६७॥
१६७ द्विशीर्षं सप्तहस्तं च त्रिपादं सप्तजिह्वकं। त्रिधारूपमतिक्रूरैरस्त्रैः षड्भिरीक्षणैः॥ ६८॥ सव्येष्वथ तु भिर्हि
स्तैः स्रक्सेक्त्यग्नी स्रक्स्रुक्स्रुचौ तथा। इतरैस्तोमरं तालवृंतं सर्पिः सुभाजनं॥ ६९॥ नदं तमनिशं ध्यात्वा वक्तुं ध्या
येद्भुवि भुजं। क्रूरेषु सर्वहोमेषु ध्यानमेवं नवमीरितम्॥ ७०॥ वह्नेः शिरसि देहे वा श्रोत्रे च दक्षिणे वा तथा। जुहु
167 या च्चेत्तदा क्षिप्रं तदंगोत्थं विनाशयेत्॥ ७१॥ ततस्तद्वक्त्रयोर्जिह्वा सप्तकं सस्य गर्वयेत्। जुहुयाच्च समाप्नोति
वांछितं सकलं क्षणात्॥ ७२॥ हिरण्या कनका रक्ता कृष्णा जिह्वा यथार्थकाः॥ दक्षवक्त्रगताः सर्वसिद्धिदा
ज्ञानुरर्चनात्॥ ७३॥ सुप्रभा वातिरक्ता च बहुरूपा च वामगाः॥ वक्त्रपार्श्वजिह्वायां होमः सर्वार्थसाध — राम
कः॥ ७४॥ ऊर्ध्वतरा सुरूपा नैव जिह्वायामुक्तायां तत्र कर्म तु॥ सामान्यतो नित्यहोमइद्या॥ शृणु सुन्दरि १६७
१ क्रूरकर्मस्वभिमतेषु तु। यस्यां जुहोति तामाद्यां समभ्यर्च्याथि सप्तशः। ७५। ततो ह्य ने + १

॥आज्यमन्नंपायसंचतिलतंडुलमप्यथ॥तद्द्रव्यंचेतिसंप्रोक्तान्युक्तान्येतानिनित्यके॥७७॥शुभैर्दर्भै
:परिस्तीर्यसर्वत्रशुभकर्मसु॥अभिचारेषुवाणैःस्यात्क्रूरेष्वन्येष्वपिप्रिये॥७८॥नकृत्रद्वद्वैस्तद्योनिर
छे३ क्ताद्यवस्रणातथा॥तन्मांसैस्तत्रतत्रोक्तैर्द्रव्यैःक्रूरेषुकर्मसु॥७९॥प्रसूनान्येकमेकंतुफलानिचतथा
हुनेत्॥अन्नाज्यादिसमस्तंतुनिष्कमानंहुनेत्क्रमात्॥८०॥स्नातोविशुद्धवसनोधूपस्रग्गंधवासितः॥प्र
सन्नचित्तवदनःकुर्याद्धोमंचसाधकः॥८१॥प्राङ्मुखोविष्टरासीनःप्राणायामपुरःसरं॥न्यस्तगात्रोर्चितो
येनप्रोक्षयेत्कुंडमध्यकं॥८२॥इत्याद्यन्यानितत्रस्थान्यशेषाणिविशुद्धये॥दर्भेणाविलिखेत्कुंडमध्ये ति३
रेखाचतुष्टयं॥८३॥प्राक्प्रत्यग्दक्षिणोदक्तत्रजिह्वाःसमर्चयेत्॥प्रागादिषुतुसप्तापिमध्येवह्निंतया
स्मरन्॥८४॥पूजयेत्सर्पिषाहोमंकुर्यात्सप्तक्रमेणवै॥जिह्वानामभिरेकैकंवह्नेस्त्वद्यज्वरादिकं॥८५॥स्वा

तं॰ अ हुतं तं मंत्रमुदितं अष्टानां क्रमतः शिवे । वह्निं समाजनं हस्ते गृहीत्वांगारकं च तत् ॥८६॥ क्रव्यादेभ्य इति ।
१६८ प्रोक्त्वा त्यक्त्वान्यत्तु समाजनं ॥ त्रिः परिभ्राम्य कुंडं तु तन्मध्ये विन्यसेत्ततः ॥८७॥ प्रज्वाल्यं ललिताद्याभि
[illegible] र्विद्याभिः परिषेचनं ॥ कृत्वा दर्भैः परीस्तीर्य पलाशाश्वत्थपत्रकैः ॥८८॥ तथाघृताहुतीः कृत्वा
ना॰४ नित्याषोडशमूलतः । जुहुयादेकमेकं तु [illegible] नित्यात्म भूतजैः ॥८९॥ ततश्च परिषिच्याग्निं देह्यात्मानं
विभाव्यं ताम् ॥ स्वाज्ञास्थ्यानगतां बुद्ध्या परिस्तरा पूर्वकम् ॥९०॥ दग्ध्वा मौं भस्मना कृत्वा तिलकं व्यस्तकेषु ॥ गात्र ५
168 ष्वजां समाप्य विचरेत्स्फुरवीतद्रूपवान्नरः ॥९१॥ क्रूरकर्मसु होमेषु विधिरेष उदाहृतः । तेषु तद्धोमक
रणा समाप्नो नित्यशस्तथा ॥९२॥ साभ्यंगं विद्यया स्नानं कुर्यात्संपूजयेत्तया ॥ नित्यक्रमं ततो नित्यं
तत्तद्दिवसनित्यया ॥९३॥ मिथुनानि च पंचाशत् पूजयेत्त्वामेदपि ॥ मंडले पूर्वमुदिते त्वाह्निमाभि राम

१६८

होमंतु त्रिविधं प्रोक्तं स्थूलसूक्ष्मपरत्वतः ॥ ८५ ॥ सूक्ष्मं परं च वोत्तरस्मिन्पटले सम्यगीरितम् ॥ १

कुंउक्कृप्तिनमि ५ ज्ञेयानि

त्फदीरयेत् ॥ ८४ ॥ एवं ते कथितं सर्वं कुंडादिषु समीरितं ॥ इतरस्य विधाने तु यानि तानि तु ॥ ८६
प्रोक्तानि सकलानीत्थं होमाल्लक्ष्मीमवाप्नुयात् ॥ विनाशयेदरातीन्स्वहोमैः पापानि वात्मनः ॥ ८७ ॥
ना॰ ३ नासाध्यमस्ति होमेन नैनवाप्यमयीश्वरि ॥ तस्माद्धोमेन सकलं साधयेत्सर्ववांछितं ॥ ८८ ॥ विद्यातत्वम
यीथ्यास्त्रिरिति सम्यक्समीरिता ॥ अस्यानि फालनात्त्विन्नेतत्तत्वं स्वात्मसात्कृतं ॥ १०१ ॥ ॥ इति श्रीनित्या
५ नित्या षोडशिकातंत्रेषु श्रीकादिमते एकोनत्रिंशः पटलः ॥ ॥ अथ षोडशनित्यानां सामान्यावास्तदेवताः ॥ ता
सां चक्रं तत्र पूजाक्रमं सम्यक्वदामि ते ॥ १ ॥ तत्फलानि च तद्धोमं विधानानि तथा बलिं ॥ सूक्ष्म होम वि
धानानि तत्फलानि च तद्धोमं विधानानि तथा बलिं ॥ सूक्ष्महोमविधानानि तथा बलिं सूक्ष्महोमविधाना
नि तत्फलानि च तद्धोमं विधा ॥ नानि तथा बलिं सूक्ष्महोमविधानानि तथा तत्फलानि परान्तथा ॥ २ ॥ क्रमेण

शृणु देवि प्रोक्तानि फलसिद्धये। यैर्विना भुवने मंत्राः सर्वे स्युर्निःफला ध्रुवं॥३॥ चतुरस्राकृतिः क
श्चिदसुरः सर्वनाशकृत् पुरा तस्य वधायैव सर्वे देवाः समुद्यमं॥४॥ कृत्वा निहंतुमुद्युक्तास्तैरवध्यो नव
द्वरात्॥ आवयोस्तन्निरासाय ममेत्याकथयंस्तदा॥५॥ कथयास्माकमधुना तद्वास्तुपुरुषस्य तु॥ दर्प
शान्तिं न चेत्तेन विश्वमासीदुपद्रुतं॥६॥ इत्युक्ते तैर्मया प्रोक्तं निधनं तस्य दुःशकं। खातात्तमेव नैतस्य
शरीरे स्थापयेत्तथा॥७॥ नित्यशश्च त्रिपंचाशन्नित्यं दाक्रमणाय वै॥ नियोज्यते षां ये पूजाविमुखास्ते
: कृतानि तु॥८॥ सुकृतानि समादद्युः दुःकृतानि च कुर्वते॥ तस्मात्तेषामर्चनं तु प्रत्यब्दं कुर्वतां सदा॥९॥ शु
भान्येवासुजायंते नैवासुभं कदाचिव॥ तच्चक्रादि विधानं तु शृणु सम्यक् ब्रवीमिते॥१०॥ प्राक्प्रत्यगुद्दिगो
दक्षा कृत्वा वेदशसूत्रकं॥ तेरे कासीतिकोष्ठानि जातानि स्युः समानि च॥११॥ तेषु [illegible]कं तु कुर्यात्कोष्ठा

नितद्बहिः॥एकीकुर्यात्त्रिकोष्ठानिदिक्षुप्रागादिषुक्रमात्॥१२॥ततश्चतुर्षुकोणेषुतिर्यक्सूत्रंचतु
ष्कतः॥द्विधाकुर्यात्कोणकोष्ठान्यष्टौतान्पार्श्वयोःपुनः॥१३॥एकीकुर्यात्तयाद्वेद्वेतद्बहिर्थ्यादिक्षुमध्यत
ःएकमेकंभवेच्छिष्टंवहिर्द्वात्रिंशदीरितं॥१४॥सर्वमध्येयजेत्सम्यक्ब्रह्माणंकमलासनं।हेमाभंचच
तुर्वक्त्रंवेदाध्ययनशीलिनं॥१५॥प्रागादितद्बहिश्चापियजेदेतान्प्रदक्षिणम्॥आर्यकंचविवस्वंतंमित्रम
न्यंमहीधरं॥१६॥कोणार्धकोष्ठयोरेकमेकमष्टौचतद्द्वये॥वह्न्यादीशांतमभितःपूजयेत्पूर्ववत्प्रिये
॥१७॥सावित्रःसविताशक्रइन्द्रजिद्रुद्रतजयौ॥आपापवत्सकौचेतिप्रोक्तास्तेष्टौतुनामतः॥१८॥कोणा
र्धकोणपार्श्वस्थेष्वग्न्यादीशांतमर्चयेत्॥शर्वगुहंचार्यमाणंजंभकंपिलिपिंजकं॥१९॥चरकींचवि
दारींचपूतनांचमहेश्वरि॥बहिरीशादिपरितोयजेदष्टौदिशंप्रति॥२०॥ईशानश्चाप्यपर्जन्योजयंतःश
क्रश्चोष्टौक्रमेणतारादौर्न्नमोंतैर्नामभिस्तथा।अन्यानपिचचक्रेस्मिन्प्रोक्तान्सर्वांस्तथार्चयेत्॥२१

तग्य·१

तं ज· १७० क्र भास्करौ॥ सत्योवृषांतरिक्षंच पूर्वाशाकोष्टगाः क्रमात्॥२१॥ अग्निःपूषा च वितथो यमोथ गृहर
क्षकः॥ गन्धर्वोभृंगराजश्च मृगोदक्षिणकोष्ठगाः॥२२॥ निर्ऋतिश्च तथा दौवारिकः सुग्रीवकस्तथा
170 ।वरुणःपुष्पदंतश्चासुरःशोषारव्य रोगकाः॥२३॥ पश्चिमाशास्थकोष्टेषु पूज्या एते यथा क्रमं। वायुर्न्ना स्क ३
गस्तथा मुख्यःसोमो भल्लाटकस्तथा॥२४॥ अर्गलोदितिरप्येवमदितिश्च यथाक्रमं। कोष्ठेषूत्तरसंस्थे
पा·प्राच्ये षुदेवतास्ताःसमीरिताः॥२५॥ द्वितीयवीथीमध्यस्थ चतुष्कंकोणसूत्रतः। कृत्वा चतुर्धा तेष्वेव प्रागादि
षु तथा क्रमात्॥२६॥ मध्ये युगार्णपर्यायनित्यार्णमालिखेत्क्रमात्॥ प्रागादिषु तथा दक्षे नित्यार्णोर्ध्वद
यार्णकं॥२७॥ पश्चिमे भूमितो याग्निवायून्कर्मान्तिकाल्लिखेत्। सुसमे पूजयामीति विलिख्यात्र यजेत्त्व राम
तान्॥२८॥ प्रत्येकं तेष्वेनेकुंडे चतुरश्रेन्दुदिक्करवः॥ प्रीतिसुद्धयवैःक्षौद्रघृतदुग्धाप्लुतैःक्रमात्॥२९॥ १७०

=द्वितीयां तार२=

अष्टोत्तरशतंवाष्टोत्तरंविंशतिमेववा॥प्रत्येकंतेर्जुह्नेनद्रव्यैर्मंत्रैस्तद्वच्चपायसैः॥३०॥वलिंचतेषांकुर्वी
तपायसैर्भोजनान्वितैः॥ससितैर्दुग्धकदलीफलापूपादिसंयुतम्॥३१॥एवंसिंहगतेभानौपूर्णायांप्रति
वत्सरम्॥स्वगेहेवास्त्कश्जायांमंडलेसत्कृतक्रमं॥३२॥कुर्यात्तद्दिवसेविप्रान्नित्याभक्त्यान्यथावलं॥अ
यादहीनान्विविधैर्मधुराद्यैस्तुतोजयेत्॥३३॥भुक्तेभ्योदक्षिणांदद्याद्यथाशक्तिसमर्च्यतान्॥एवंवि
दधतोगेहेनाकल्याणंकदाचन॥३४॥नवालमरणंव्याधिभूतप्रेतादिकानिच॥नसर्पपीडानान्योन्यक
लहाद्यशुभानिच॥३५॥पुत्रपौत्रधनारोग्यपशुदासीसमृद्धिभाक्॥अरोगीविजयीस्यात्तश्चिरंजीवति
तद्गृहे॥राजवेश्मसुसर्वत्रतथाचमहिषीगृहे।सविवामात्यसेनानीचवनेषुपुरेतथा॥विदध्यात्प्रतिवर्षंतु
प्राक्सिद्ध्यैतुदेशिकः॥नचेद्कुर्यात्तथारूपफलैःक्लेशोनिशंभवेत्॥३६॥त्रिलोहाश्मतलेषन्यतमेहस्त

प्रमाणके। तत्तद्दैवतनामानि मायागर्भे समालिखेत्॥ ३७॥ तत्र तान्पूजयेत्सम्प पंचविंशैकवासरं॥
स्थापयेद्वेश्मसुष्का पि नित्यशश्चाप्य तत्रवै॥ ३८॥ स्मरं स्तादेवता वुद्ध्या कुर्यात्पुष्पांजलिं त्रिशः॥ त
द्वेश्म मंगलग्रामपुरखर्वटकादिषु॥ ३९॥ विदध्यादखिलत्क्षाद्य क्लेशशांत्यै समृद्धये॥ ततः सूक्ष्मैंपरा रैव क्लै॰३
च होमैः सिद्धिं शृणु प्रिये॥ ४०॥ स्वमूलाधारके वह्नौ कुंडलिन्यग्रगामिनि॥ वाच्यवाचकरूपं वं जुहुया पंतुप्र ४
त्तथा॥ ४१॥ येनावयोः समो देवि ज़ायते हवनेन वै। तद्विधानं वद प्राज्ञ शंभो सम्यक्क्रममाधुना॥ ४२
आधारे वह्निसंस्थानं कुंडलिन्यां स्थितिं ततः। तद्रूपं तत्क्रियां सर्वं वद मे विशदं प्रभो॥ ४३॥ शृणु वक्ष्ये
विधानं ते सम्यक्कुविस्तरतोधुना॥ प्राणाग्निहोत्रविद्येति यत्र यां श्रूयते परं॥ ४४॥ यत्ज्ञात्वा वनिताग
र्भे न प्रयाति नरोद्भुवं॥ यद्व्ययाथासरहितमनन्यापेक्षनिर्वहं॥ ४५॥ यन्मनःक्लेशविश्रांतेः स्थानं निःशेष
ध्रु

कल्मषं। सुखास्पदं स्वर्गं विश्वमयं विद्धि ह्यवेदनात्॥४६॥ अत्रोक्तशेषमखिलं षड्विंशे पटले स्फुटं॥ प्र
दर्श्यते ततस्तत्र वर्ण्यामि च किंचन॥४७॥ नित्यानित्योदिते मूलाधारमध्येस्ति पावकः। सर्वेषां प्राणिनां त
द्वत् हृदये च प्रभाकरः॥४८॥ मूर्धनि ब्रह्मरंध्राधश्चंद्रमा ह्यवस्थितः। तत्त्रयात्मकमेव स्यादाद्या नित्या त्रि
खंडकं॥४९॥ तेषां त्रयाणामैक्यं तु मनसा भावयेत्तथा। गमागमाभ्यां तेजोभिस्तेषामन्योन्यजैः शिवे॥५०॥
तया समिद्धं तत्तेजस्त्रयं बुद्ध्वाथ तन्मयं। विश्वं विकल्पविधुरं तावद्ये दहुतं हुतं॥५१॥ तेषां त्रयाणां वर्णानां
प्राग्युक्तानां क्रमेण वै॥ द्वाभ्याम न्यतमं कृत्वा पुटितं जुहुयाच्च तैः॥५२॥ पुटिता भानु हृद्गौर्स्वरास्तारे णाहु
कृतैः। कुंडलीमुखमार्गाग्नौ जुहुयात्त्रिश्वलाशयः॥५३॥ वह्निभानुपुटस्थेश्च चांद्रैस्तद्वद्धुनेत्क्रमात्॥ चं
द्रभानुपुटान्तस्थैर्वह्न्यर्णैर्जुहुयात्तथा॥ भानुचंद्रपुटान्तस्थैर्वह्न्यर्णैर्जुहुयात्तथा। चन्द्रवह्निपुटान्तस्थै

तं॰ ज॰ र्भिन्नैरौर्जुष्टुयादपि। वह्निर्वं द्रुपुटांतस्थैरपि तद्ध्रुनेत्रुतैः॥५४॥ तथा तेषां प्रातिलोम्यात्षोडशा
१७२ नांहुनेदपि। एवं द्वादशधा होमम ह्नरैस्याडुदीरितैः॥ कृत्वा तद्वाच्यमखिलमर्थरूपं चतैस्समन्। ते
जस्त्रयात्मरूपं स्यादावयोरपि तद्वपुः। अच्यानि चावयोरिच्छागृहीतानि वशुंषि वै। तान्यन्यदेवतादेहस
मानीच्छावशानि च॥५५॥ मुक्तिश्च तन्मयी तावत्स्थैर्यमेव समीरितं॥ तत्र कुंडलिनीं ब्रूहि स्फुटं मे परमे
172 श्वर॥५६॥ तां वदामि शृणु प्राज्ञे रहस्यं परमाद्भुतं॥ मूलाधारस्य वह्न्यात्मतेजोमध्ये व्यवस्थिता॥५७॥
जीवशक्तिः कुंडलाख्या प्राणाकाराथ तेजसा। प्रसुप्तभुजगाकारा त्रिरावर्त्तमहाकृतिः॥५८॥ माया
शीर्षानदंतीतामुच्चारंत्यनिशं स्वगे॥ सुषुम्नामध्यदेशे सा यदा कर्णाद्द्वयस्य तु॥५९॥ विधायन श्रृणोत्ये राम
तां ध्वनिं तस्य तदा मृतिः। एवं सा जीवशक्तिस्तु यदा कुंडलिनी स्थिता॥६०॥ विहाय स्तज्जुतां याति स्वे १७२

९८

क्वादंडाहता सती॥ तदा विश्वप्रतीतिः स्यात्प्राणिनामन्यदा पुनः॥ निशांधकारे भुवन स्थितिवत्स्वा
त्मनः स्थितिः॥ एवं तां वेत्ति यो देहे देशिकादेशदर्शिताम्॥ स वेत्ति ब्रह्मपरमं मां त्वामपि च साधकः॥
जीवन्मुक्तः स विज्ञेयः शुद्धात्मा ऽसक्तमानसः। अस्पृष्टपुण्यपापश्च शोकहर्षातिभूमिकः॥ राग
द्वेषविनिर्मुक्तस्त्यक्तसर्वक्रियाफलः॥ निरुपाधिकसंतुष्टः स्वेच्छाधीनेच्छया युतः॥७१॥ स्वदेहमात्र
यात्रश्च समश्च स्तुतिनिन्दयोः। समारिमित्रः कल्याणगुणशीलदयान्वितः॥७२॥ एवं स कथितो जीव
न्मुक्तो लोकेषु साधकः। इतरः पूजने देव्या भजने च सकौतुकः॥ कालेन सिद्धिभाक्स्याद्यदितरो दुःखला
जनम्। जन्मभिर्बहुभिः क्लिष्टो मूर्खो विद्याधनोऽज्झवैः॥ मदे उन्मत्तचित्तः स नधोधो याति योनिषु॥ नि
त्या सुभक्ति र्भुवने प्रवृत्तो पापकर्मणि। दृश्यन्ते मानुषन्द्वारं बुधजीवसिता सिताः। अन्ये च लोकपालाद्या
जायते यद्वलाल्लोके भवेत्प्रागुक्तलक्षणः। नरो न वंति तां भक्तिं प्राप्य लोकेषु देवताः।१८

तं॰ अ॰ स्तद्भक्तिप्राप्तसंपदः।जायतेपद्मलाल्लोकेभवेन्मायुकलक्षणाः।नरोभवंतितंभक्तिंप्राप्यलोकेषुदेवता
१७३ ः।।७१।।वद्भुनाकिंपरंदेविनित्याभिंसदृशानघे।।नसन्तिदेवतानित्यास्तस्मान्नाएवदेवताः।।भावयाम्यहं
मद्यापित्रिकालेविग्रहाश्विताः।।७२।।तद्वर्णाध्यानचक्रस्थाग्रहाश्चतवदर्शिताः।विधिविष्णुशिवात्मत्वंतासा
मेवनिजेच्छया।।७३।।अन्याश्चदेवतायायास्तास्तास्तन्मयविग्रहाः।।पररूपंतुवक्ष्यामिहोमंतेमहदद्भु
173 तं।।७४।।यत्सिद्धिःसिद्धरूपाणांप्रागुक्तानांभवेत्सदा।।अन्येषांनभवेद्भावस्तथासर्वाश्रयोमहान्।।
प्रक्षीणाशेषपापानांभक्तिःस्यान्नज्ञसेविनां।।नित्याविद्यासुभक्तानांलक्षणंशृणुसुंदरि।।७६।।आ
मुष्मिकासंशयत्वंसंतोषोनित्यपूर्णता।सुखितात्यागिताज्ञानंकृतज्ञत्वमलुब्धता।।७७।।अकार्प
ण्यमदीनत्वंपरचिंतानिरुद्यमः।।दयालुतामनस्वित्वमवैषम्यंमनःस्थितौ।।७८।।लाभहान्याः राम
१७३

४ स्थूलं सूक्ष्मं चयन्मयं। उच्चावचविकल्पानां वस्तूनामग्निदाहतः तन्मयत्वादेकरूपं ४ +

तिरोधाभावः कल्याणशीलता। कल्याणाभिनिवेशित्वं सदा कल्याणकीर्तनं॥७९॥ अकल्याण
कथालापवैमुख्यं स्वेच्छया स्थितिः। सदैश्वर्यैवभोक्तृत्वं नैष्ठिकत्वमजिह्मता॥८०॥ सर्वानुकूल्यं संगी
तप्रियत्वं वांछिताप्तयः॥ राजयोषित्प्रभुराजत्ववहुमानममत्सरः॥८१॥ सर्वोत्तरत्ववांछा बलक्षणानी
रितानि ते॥ यद्विकल्पस्वरूपं तु मनस्तन्निर्विकल्पके॥८२॥ निधानं परहोमं तु स्थूलहोममुदीरितं। सू
क्ष्महोमं तथा शब्दैर्नानारूपैस्तु वाचकैः॥ वाच्यार्थानामशेषेण वेद्यवेत्तृविदात्मनां। स्थितिः परो भवेद्धो
मः सर्वभेदविलापनात्॥ स्वात्म रूपमहावह्निज्वालारूपिषु सर्वदा। निरिंधनेद्धरूपेषु परमार्थात्म
ह्रा२ निस्थिरे॥ निर्विघ्नान विलापस्तु परहोमः समीरितः। तेष्वक्षेषु कुण्डेषु चतुरस्रे समाचरेत॥ होमका
र्मसमस्तं तु शुभात्मकमुदीरितम्॥ अशुभात्मकमुक्तं तु कुर्यात्त्र्यस्रे समीरिते॥८४॥ अन्येष्वन्यानिका

तं·ज र्यीतिप्रोक्तानिप्रोक्तरूपतः।प्रागुदक्शिवैर्दिग्वक्त्रंकुर्याद्धोमंतुमंगलं॥९५॥दक्षिणास्योभिचारं
१७४ तुगदेवह्निमुखोद्विषां॥उच्चाटनंवायुमुखोविद्वेषंराक्षसोन्मुखः॥९६॥विदध्यात्पश्चिमास्यस्तुक्रू
राण्यन्यानिकृत्स्नशः॥स्वदेशग्रामगेहादौतानिकर्माणिनद्विशि॥९७॥विदध्यादुपविश्योक्तमन्य
यानर्थमावहेत्॥कुंडादिकरणाशक्तौस्थंडिलेहोममाचरेत्॥गोमयैःपरिघृष्टेतुसुसमेभूतलेशु म·पा४
भे॥वालुकाःहस्तविस्तारायाममास्तीर्यतत्रवै॥मध्येविदध्याद्धोमंतुप्रोक्तमेवमशेषतः।कालतत्व
मयीयाश्रीरितिसम्यक्समीरिता॥अस्यानिफालनाविन्नेतन्नत्वंस्वात्मसात्कृतं॥१०१॥ ॥इतिषो
डशनित्यातंत्रेषुश्रीकादिमतेत्रिंशत्तमःपटलः॥ ॥स्तत्क्रमंपरंचहोमंनेकथितंपरमेश्वरि॥इदानीं राम
स्थूलहोमंतुकथयाम्यारिमर्दनं॥१॥तत्तत्कर्मोदितेकुंडेकुर्याद्धोममुदीरितैः॥विधानैरोगनिग्रह १७४
नैर्द्वैषनिध

चाटनैः॥ ३॥ आयुर्दायं रिपोर्ज्ञात्वा लग्नोक्तकर्मानुगुण्यतः। तदात्मिकग्रहाणां च स्थितिमष्टकवर्ग
कम्॥ त्रयाणामानुकूल्ये न कुर्यात्तदभिचारकं॥ अन्यथा क्रूरकर्माणि कुर्वाणं नाशयंति हि॥ ४॥ ता
न्येव कर्माणि ततस्तत्त्रयप्रातिकूल्यतः॥ कुर्यात्तद्देवताभक्तिमास्तिक्यं वर्तनं गुरुं॥ ५॥ तत्पार्श्ववर्ति
मंत्रज्ञानालोच्य रिपुनिग्रहं॥ विदध्यादन्यथाशक्त्या नैष्फल्यं चात्मनाशनं॥ ६॥ रिपोरष्टमलग्ने च षफ ४
काले त्वष्टमराशिगे॥ स्थाने कुर्यादनिष्टानि तद्विनाशाय साधकः॥ ७॥ प्राच्यां मेषवृषौ वह्नौ मिथु
र्दे३ नं दक्षिणे तथा। कुलीरसिंहमथुतन्निर्ऋत्यां कन्यका स्थिता॥ ८॥ तुलाकीटौ पश्चिमतो धनुर्वायौ तु
संस्थितं॥ मकरकुंभावुत्तरतो मीनमीशे तु संस्थितं॥ ९॥ एवं राशिक्रमं ज्ञात्वा कुर्यात्कर्माणि देशतः
॥ काले तु पंचपंच स्युर्घटिकाः क्रमयोगतः॥ १०॥ चैत्रादिषु तु मासेषु द्वादशस्वपि भास्करः॥ मेषादि

तं अ राशिगो याति तथान्यैर्ग्रहमंडलैः ॥११॥ देहेषु प्राणिनां तद्वदष्टांगुलिविभेदतः ॥ मूर्धादिचरणांतं तु
१७५ तान्नु द्वादश सुलक्षयेत् ॥१२॥ त्रयाणामानुपूर्व्येण कुर्यात्कर्माणि नान्यथा ॥ शुभाशुभानि सर्वाणि
फलंत्येवं कृते ध्रुवं ॥१३॥ तथाहनि विषस्यानान्यमृतस्थानकानि वा ॥ ज्ञात्वा विदध्यात्सुतल्पाप्रयोगं
175 सर्वतस्तथा ॥१४॥ मिते हृदि स्तनं गले नासाक्षिणि तथा श्रुतौ ॥ भ्रू शंखं मूर्ध्नि मध्येषु तत्र शंखं भ्रुमध्यत
ः॥१५॥ कर्णे नेत्रे नासिकायां वर्तते पुरुषस्य तु ॥ सव्यकंठस्तनतटे हृदि नाभौ च गुह्यके ॥१६॥ जानुसं
षु ६ ध्यंघ्रिपार्श्वे तथांगुष्ठे वदंक्षिणौ ॥ अंघ्रौ संधौ जानुगुह्ये नाभौ वेति सितेतरे ॥१७॥ तिष्ठेद्विषकलापुंसि स्त्रि
यां वामादि वर्तते ॥ विषनाड्या विषस्थाने वेधयेत्कंटकेन तु ॥१८॥ संकोचकाव्येन न तदाती त्रेणास्थिमये राम
था नवै ॥ व घृतादि समुत्थैर्वा तथाप्यः सारस्त्रविभिः ॥१९॥ पुत्तल्यायं त्रतद्विषं तदंगंशास्त्रदेहजं ॥ ध्याविनापी १७५

अंशकराशि [illegible]

डि तं कालाद् विधेयं भवेद्ध्रुवं ॥ तत्र जेनार्त्तिनाक्लिष्टो जीविते शत्रुपुरं व्रजेत् ॥ पुत्तलीकरणं वक्ष्ये शत्रु
निग्रहसिद्धये ॥ २१ ॥ भौमशुक्रबुधाश्चंद्रो भास्करः सौम्यलागवो ॥ मंगलो गुरुमंदार्किगुरवोंशकेराशि
पाः ॥ २२ ॥ नक्षत्राणि चतुष्पादान्येवमष्टोत्तरं शतं ॥ एतावत्यश्च पुत्तल्यस्त्वंशकक्रमयोगतः ॥ २३ ॥
प्रथमे नवके चंद्रभास्करांशकयोः क्रमात् ॥ षोडशद्वादश तथा मानमंगुलिसंख्यया ॥ २४ ॥ अन्यांश
केषु सर्वाश्चतुर्दश समीरिताः । द्वितीये नवके च्चेषामध्यर्धास्तु त्रयोदश ॥ २५ ॥ तृतीये नवकेन्येषां
त्रयोदश समीरितम् ॥ चंद्रार्कयोरेकविधः प्रोक्तसंख्या क्रमस्तथा ॥ २६ ॥ पुत्तलीकरणे द्रव्यं चक्रि
हस्तमृदान्वितं ॥ चिताभृङ्गरसलवणं शुंठीपिप्पलिकायुतम् ॥ २७ ॥ मरिचं टङ्कधूमं वलश्चनं हिंगुसैन्ध
वं गैरिकं चेति कथितं पुत्तलीद्रव्यमीश्वरि ॥ २८ ॥ साध्यदृष्टहृतैः पिष्टैश्च मोषण्णाँश्च सिक्थकैः ॥ वैरिदे

[illegible]

तं अ हृजरोमाद्यैरूपैतैःपुत्तलीक्रिया॥२९॥पुत्तलीदैर्घ्यमानंतुकृत्वाशेषांमथैकतः॥शीर्षत्रयात्कटेरूर्ध्वं
१७६ त्रयात्पादद्वयंतथा॥३०॥कटीत्रपदयोरेकमंशमेवंतुपुत्तली॥विधायमंत्रैसर्वत्रप्रयोगानाचरेत्ततः॥
३१॥पातालयोगेनीचाख्येविषयोगेचमृत्युजे॥नाशयोगेवदिनजमृत्युकेककचयोगके॥३२॥चंडीश
४ श्र चंडायुधकेमहाशूलेचकाणके॥रक्तस्थूणेकंटकाख्येस्थूणेकंपंचार्कसंज्ञके॥३३॥कुर्यात्त्रियोगा
न्समर्थोमंगायनिधनायवा॥निग्रहायनिरीक्ष्यैवंकुर्यात्सिद्धिमवाप्नुयात्॥३४॥वश्याकर्षणविद्वेषस्तं
176 भनोच्चाटमारणे॥विदध्यात्पुत्तलीःसम्यक्चतस्रःप्रोक्तयोगतः॥३५॥पिष्टेनसिक्थेनतथाचक्रिहृ
त्तनुःहादिवा॥साध्यनक्षत्रवृक्षोत्थमृत्कुलकणासंयुताः॥३६॥आसनेपादयोःस्थानेकुंडमध्येचसाध
कः॥पिष्टमृत्तरुजाःखात्वास्थापयेत्सिक्थमंचरे॥३७॥कुंडमध्यादुपर्यूर्ध्वपदंन्यकृशीर्षिकामपि॥ राम १७६

कुर्या

एवं साधारणां कृत्वा कर्म समीरितम् ॥ ३८ ॥ सर्पशीर्षस्रुवा होमं कुर्यादशुभकर्मसु ॥ वैरिणोन्य
स्तु जा कृत्वा चरुं तु जुहुयात्तथा ॥ ३९ ॥ त्रिकोणकुंडे यमदिङ्मुखो भूत्वार्धरात्रके ॥ श्मसाने नि
र्जने देशे विदध्यादभिचारकं ॥ ४० ॥ यत्राभिचारहोमं तु करोति मुनिसाधकः ॥ तत्राभितो नृपो रक्षां का
रयेदात्मसिद्धये ॥ ४१ ॥ न वेद रा नृपतिश्चारैर्ज्ञात्वा निहंत्यमुं ॥ स्वराष्ट्रे संधौ कुर्वीत न कुर्वीत स्व
मंडले ॥ ४२ ॥ यदि कुर्यात्प्रमादेन मांत्रिको ज्ञानमोहतः ॥ तदा राष्ट्रं पीडयंत्येव शनकैर्वैरिभूभृतः ॥ ४३
अर्कद्रुमसमिद्भिश्चैतत्फलैश्च करंजजैः ॥ हैमीदलरसाक्तैस्तु होमाच्छत्रून्विनाशयेत् ॥ ४४ ॥ न क्रम स्त्रु३
लसमिद्भिश्च तत्फलैर्वा तथा हुनेत् ॥ रिपुरस्य पौरोगार्तः प्रयाति यमसादनम् ॥ ४५ ॥ उन्मत्तकाष्ठैः प्र
ज्वाल्य वह्निं तद्बीजकैर्हुनेत् ॥ तत्पत्रं तु स्रुवेण मासाद् रात्रिश्चोन्मत्ततामाप्नुयात् ॥ ४६ ॥ आरग्वधसमिद्भि

=उन्मत्तपत्रां स्रुतैः ३=

= आरुष्करोमल्लातकी १ =

तं॰ ज॰ ग्नौ तत्समिद्भिश्च तत्फलैः॥ वितस्तिमात्रैस्तैलाक्तैर्हवनाद्वैरिणो मृतिः॥४७॥ आरुष्करसमिद्धे ग्नौ
१२७ तद्बीजैस्तु हुताक्तैः॥ होमादरातेस्तीव्रार्त्तिं ज्वरेण स्यान्मृतिर्ध्रुवम्॥४८॥ सौवीराक्तैस्तु कार्पास
बीजैर्होमात्तु मण्डलात्॥ अरातीनां मथान्योन्यकलहाग्निधनं भवेत्॥४९॥ सर्षपाज्यप्लुतैः शुण्ठी
मागधीमरिचैर्हुनेत्। वैरिजन्मर्क्षवृक्षाग्नौ मण्डलान्तं मृतिर्ज्वरात्॥५०॥ प्रागुक्तैः पुत्तलीं कृत्वाङ्ग
धैर्युक्तविधानतः॥ सर्षपान्तु क्षार घृत संसिक्तैर्जुहुयान्निशि॥५१॥ आयच्छित्वा तदंगोत्थैस्तु क्षुद्रचित्तो॥ या ५
...गां वरः। रक्तस्रग्गंधपुष्पादियुतशत्रून्नु विनाशयेत्॥५२॥ आयुष्यवर्द्धनीयमिति अरुष्क
र घृताभ्युक्तैर्...स्तद्बीजैः सर्पशीर्षकैः॥ हवनाद्वैरिणो दाहज्वरप्राप्तिस्त्रिभिर्दिनैः॥५५॥ वै
रिनक्षत्रयोन्युक्तमांसैस्तद्रक्तसंप्लुतैः॥ हवनात्तत्समुद्भूतसमिधां हवनादपि॥५६॥ दिनैः केश्चि राम १२७

177

द्विपुंल्लिङ्गेनाशमेतिसुनिश्चितं॥ द्रुमङ्कुशनिपातेननिर्घातेनारिभिङ्क्तः॥४७॥ सलिलेपावकेसर्पदं
शान्मन्त्रद्विपान्गदाहा॥ यक्षराक्षसगन्धर्वपिशाचब्रह्मराक्षसैः॥४८॥ अन्यैर्वाकारणैः क्षिप्रंनाशमे
तिरिपुर्ध्रुवं। निंबपत्रैश्चकार्पासवीजैस्तज्जैः करंजलैः॥४९॥ हवनात्सर्षपस्नेहसिक्तैर्विद्वेषणंभ
वेत्॥ नीचयोगेकृतेनेदग्धोरिपुर्दृढक्षसमेधिते॥५०॥ तद्वृक्षखंडैस्तैलाक्तैर्निशामध्येरिपुर्दिनैः। उच्चाटि
तः स्यात्त्येवमंत्रशक्त्याभिताडितः। मृत्यपत्रैश्चतत्काष्ठैस्तद्वीजैस्तत्तुचौकृतेनत्॥ अरातेर्दन्तिनोवाहा
रोगैर्नश्यंतिनिश्चितं॥ गैरिकैः पुत्तलींकृत्वारिपोरष्टमराशिके॥ प्रागुक्तकंटकाद्यैस्तस्यदंगंवेधयेच्छुने
॥५३॥ विषनाड्यांविषस्थानेतथाचयमघंटके॥ अर्द्धप्रहरकेशीर्षेप्रहरेद्वाशनैः शनैः॥५४॥ अरातेस्त
त्तदंगैः स्यान्निधनंप्रहरादिना। ग्रंथिर्वाकंटकाद्यैः कृशस्त्रिविदारणैः॥५५॥ तन्नक्षत्रोक्तवृक्षोत्थपुत्तली

[illegible]

तं॰ज स्यापि(ते)रकांगाईमीमेह सलिले संस्थाप्य क्वाथयेच्छनैः ॥५६॥ रिपुर्दाहज्वरग्रस्तः शनैर्याति यमालयं
१७८ मधूच्छिष्टेन तां कृत्वा तापयेन्निशितां शनैः ॥५७॥ तेनोन्मादज्वरग्रस्तः प्रयाति निधनं शनैः ॥ तां तत्कंट
कविद्धांगां खनेत्पितृगृहे निशि ॥५८॥ ब्रणातिपिशाचाविष्टश्च रिपुर्याति यमालयम् ॥ प्रागुक्तैरेव तद्द्रव्यै
रशेषैः पुत्तलीं तथा ॥५९॥ निर्माय कुंडमध्ये तां खात्वा राति महीरुहैः ॥ समिद्भिर्योतत्सामिद्भिस्तैलाक्तैर्जु
178 हुयान्निशि ॥६०॥ सन्निपातज्वरस्तस्य वक्रजिह्वोति मूनधीः ॥ प्रलपन्ननकैर्हंत्य जन्याति यमालयं ॥६१
हृद् तथाविधां तां प्रतिमां निखनेत्कृष्णपक्षके ॥ नवम्यंगारदिवसे मातृगेहे ग्रपीठके ॥६२॥ सप्ताहान्निधनं वैरी
प्रयाति निशि ताडितः ॥ भूताद्यैः शिरसि स्त्रीयेनिर्घातबदलक्षितं ॥६३॥ सर्षपं माषचूर्णं च तिलं शालिज राम
तंडुलं ॥ पिष्ट्वा साध्यर्कवृक्षस्य शकलैरपि संयुतं ॥६४॥ एरंडबीजैर्मिलितं कृत्वा पुत्तलिकां ततः ॥ तद्द्रको १७८

२ निबध्यतांपादयोरक्तमानुष्टस्तो छतंतुना।गृहीवाजीवहस्तेननांजपेत्प्रयतेछुचो।।७५।। ×२

त्वन्निधायारिनामंतालस्यपत्रगं।।६५।।संजप्यतांस्पृशन्विद्यांतार्तीयप्रतिलोमजां।।साहस्रवारं
साध्यस्यवधर्देष्टमराशिगे।।६६।।हुत्वाग्नौतैःसहस्रंतुतामूर्ध्नीभ्रमवाप्नुरवी।तद्दिनेनापतत्साग्निविद्धः
लेनज्वरेणासः।।६७।।ग्रस्तदेहोलुठन्भूमौविसंज्ञःप्रलपन्मुहुः।प्रयातिनिधनंतूर्णंप्रयोगवलतश्शिवे
।।७७।।साध्यर्क्षवृक्षसंभूतांपुत्तलीमर्कदुग्धतः।वज्रीक्षीरेणवालिप्तांवद्ध्वाप्रायदधोमुरवीम्।।साध्यना
मादिसंयुक्तांकुंडाद्दर्धप्रलंबयेत्।।७८।।जुहुयात्तत्समिद्भिस्तत्क्षीराक्तैर्निशांतरा।।ज्वरार्तःस्यादराति
स्त्रिभिरेवदिनैस्ततः।।७९।।यद्यस्तितस्यरक्षेच्छातांतटाकोदरेखनेत्।।जंवालमध्येतेनास्यात्सौख्यंत
स्यशनैःशनैः।।८०।।तयायदिनकुर्वीततविरंरोगात्मकोभवेत्।।तथातामाममांडेतुनिवेश्यागारवासरे
।।८१।।चंडिकायतनेखात्वातद्योनिंतत्पुरोवलिं।।निहत्यदत्वारातिंतुनिहन्यादुपसर्गकैः।।८२।।स्वगेहे

= व्याघ्रजंघास्थिसंयुतां२ =

तं॰ ज॰ १७९ त्रुल्यधः खात्वा तदुपर्यग्निवर्धनात्॥ अविछिन्नमरातेः स्याज्ज्वरादिगदसंभवः॥८३॥ तांतथा कृतरूपां
तु उरुजंघास्थिसंयुतां। निवध्य पूर्वसूत्रेण द्विषङ्केहे खनेन्निशि॥८४॥ शौतदष्टमे मासाश्रया त्यक्त्वादि रा२
तोन्यतः॥ तथाविधं पुत्तलिकायुगं कृत्वोक्तमार्गतः॥८५॥ विडालमूषिकाचर्मनद्धं साध्याख्यया युतं॥८६
निखनेत्तीरयोर्नद्याः पितृगेहेऽथवा ततः॥ मातृगेहे नदीपूर्त्यां विद्वेषः स्याद्द्वयोस्तदा॥८७॥ तांनवंप्राय
179 दुत्पाद्य साध्याख्यादिसमन्विताः॥८८॥ न हि घाजापसिद्धास्ताः खनेदरिगृहे पुनः॥ मध्ये षट् दिक्रतुं तत्कुलो तथा५
त्सादनं भवेत्॥ एवं निकटवर्ती नामभिचार उदीरितः॥ दूरस्थितानां द्विषतां कथं स्यादभिचारकं॥ वदामि
ते शृणु प्राज्ञे सुदूरस्थस्य वैरिणः॥ विनाशने प्रयोगं तु क्षिप्रमप्यभिचारकं॥ येनारिर्निकटस्थात्तु प्रागेव नि
धनं व्रजेत्॥ तस्माद्ध्यष्टकैः पुत्तलिका विधायाष्टौ शतं क्रमात्॥८९॥ ताः प्रागुदीरितक्रीरद्वयसिक्ताः सम् राम १७९

पुत्रंपी ४

त्रकाः॥ तन्त्रदंशः कामानापघनास्तामध्यरात्रतः। एकामेकांकुनेद्दे रिदिङ्मुखस्ताऽशेषतः। तन्त्रदं
शककालेवासुदूरस्थो विनाशनाकृ॥ कथंवामांत्रिकवलीनिहंतुंशक्यतांव्रजेत्॥ ननुश्रृणु॥ त्वंशिवे
वक्षिप्रकारंतस्यनिग्रहे॥ नैर्मांत्रिकैस्तस्यपूर्वंविद्वेषंकारयेत्ततः॥ तेद्विष्टेर्निधनंतस्मिन्मुशकंस्याद
नाश्रयात्॥ मायाधिकंमहारक्षाकरंमांत्रिकसंगतं॥ राजानंराजमात्रंवाकथंहन्यात्प्रयोगतः॥ ९४
तन्मेकथयदेवेशयद्युपायंतुविद्यते॥ वदामितेश्रृणुप्राज्ञेत्वमोघं घोरविग्रहं॥ अभिचारमरातीनामाशु
नाशकरंपरं॥ सिद्धमंत्रानतिस्निग्धात्षोडशातिस्थिराशयान्॥ ९६॥ तैरवछिन्नै [illegible] तुहोमयेद्यामदिक्क्रमा ९३
त्॥ तेनतन्निधनंब्रूयाद्दक्षितस्याप्ययत्नतः॥ रातिनिग्रहंकुर्यादेवमुक्तविधानतः॥१००॥ ॥ मायातत्त्वमयी
ध्यातिरितिसम्यकुसमीरिता॥ अस्यानिकालनाथितेनतत्त्वंस्वात्मसात्कृतं॥१॥ ॥ इतिषोडशनित्यातंत्रेषु

श्लो ५२ स्पं ३

होमात्काम्यफलोदयंनाम १

तं॰ज॰ श्रीकादिमतेएकत्रिंशःपटलः॥ ॥अथहोमंप्रवक्ष्यामिललिताविद्ययाशिवे। येनमर्त्योपिभुवनेप्रख्यातो
१८० देवतासमः॥तद्विधानंशृणुप्राज्ञेद्रव्यकालादिभेदतः॥प्रोक्तेषुनवकुंडेषुतत्तत्कर्मसुबोदिते॥२॥जु
हुयादुक्तमार्गेण॥तत्राग्निध्यानपूर्वकं॥शुक्लप्रतिपदारंभात्पूर्णांतंपंकजैर्हुनेत्॥३॥कैरवैर्हवनात्तेषुदि
नेषुश्रियमाप्नुयात्॥मधुरत्रयसंसिक्तैःपुष्पैरप्यरुणैःशुभैः॥४॥अखंडितैरष्टमात्रान्नरोनृपतिसन्नि
भः॥तेष्वेवदिवसेष्वजैःसितैस्तद्धवनाहुतैः।कल्हारैर्हवनात्तेषुदिनेषुधनधान्यवान्॥तेष्वेवोत्पलहोमे
180 नश्रियमाप्नोतिपुष्कलां॥६॥अरुणोरुत्पलैर्होमात्कन्यकांसमवाप्नुयात्॥सौभाग्यंकीर्तिमारोग्यम
वाप्नोत्यर्चनादपि॥७॥तैलषड्भिःकुंकुमक्षोदस्नुतैस्तद्दिनहोमतः॥अचलांचश्रियंप्राप्यसुखीजीवतिभू राम
तले॥८॥तैश्चंदनाक्तैर्हवनात्तद्दिनेषुयथाविधिपुत्रदासीदाससुतःस्थिरंजीवतिमानवः॥९॥तैरेवंडुड्डवा १८०

त्त १

क्तैः श्रुहोमात्कंदर्पसन्निभः॥ वनिताजनैः सह नरो दीर्घायुर्बहु जीवति॥ १०॥ कृष्णप्रतिपदारंभाद्दशां
तं जुहुयात्सितैः॥ घृताक्तै रथमात्रेण॥ निःसपत्नां लभेच्छ्रियं॥ ११॥ तेष्वेव दिवसेष्वथो गुडैः क्षौद्राप्लुतै
र्हुनेत्। कांतिलक्ष्मी जुहुयारोग्ययुतो जीवति भूतले॥ १२॥ द्राक्षाभिर्दुग्धसिक्ताभिस्तद्दिने हवनान्नतः।
क्षीराहारी चिरं भूमौ जीवत्यकलुषाशयः॥ १३॥ खर्जूरीफलहोमेन त्रिमध्वक्तेन तद्दिने॥ आयुरारोग्य
विजयसंपन्नां श्रियमश्नुते॥ १४॥ कदलीफलहोमेन तथा तद्दिवसेषु तु। पुण्यकीर्त्तिर्नृपैर्मान्यो जीवेद्वर्ष
शतं सुखी॥ १५॥ नारिकेलफलक्षौद्रैः सितक्षौद्रसमन्वितैः॥ हवनान्तद्दिने रिष्टमखिलं समवाप्नुयात्॥ १६
तैरिक्षुवारिसंसिक्तैर्हवनात्तद्दिनेषु वै। वासांसि नानावर्णानि महार्हाणि लभेत सः॥ १७॥ षड्भिश्चतैस्त्रिम
ध्वक्तैर्हवनाच्छ्रियमाप्नुयात्॥ तैः सवत्ससितागव्यपयोक्तैर्हवनादपि॥ १८॥ महिषीक्षीरसंसिक्तैर्होमादिष्ट

नं ज १८१ मवाप्नुयात्॥ अजाक्षीरयुतैस्तैश्च तथा ऽविक्षीरसंप्लुतैः॥१९॥ नारिकेरफलक्षोदक्षीराक्तैरर्पितैर्हुतैः
॥ तथा द्वादशभिर्द्रव्यैरेकैकैः संहृतैस्तु वा॥२०॥ नित्यशो हवनाद्दुग्ध क्षौद्रसर्पिःसमन्वितैः। गोभूहिर
ण्यवासोभिः समृद्धो जीवति क्षितौ॥२१॥ रविवारे सितान्नैस्तु क्षीराक्तैर्जुहुयात्तथा॥ अन्नादन्नसमृद्धिः स्या २३
त् घृताक्तैर्वा मधुप्लुतैः॥२२॥ सोमवारे सितोपेतैर्नारिकेलफलैर्हुतैः। संपन्नसस्यां पृथिवीमवाप्नोति सु
निश्चितं॥२३॥ अंगारवारे क्षौद्राक्तैरन्नैर्हेमाछ्रियं लभेत्॥ तैरिष्टभूमृन्मिलितैर्हवनात्तां महीं लभेत्॥
२४॥ बुधवारे घृताक्तैस्तु होमेन तिलतण्डुलैः॥ श्रियं सकलकल्याणनिलयां लभते द्रुतः॥२५॥ गुरुवा
रे दुग्धसिक्तपनसास्थिपरायकैः। जुहुयाद्धेममात्रेण लभते गेहमुत्तमं॥२६॥ सितवारे नालिकेलक्षोदैः राम
सितसमन्वितैः॥ गुडान्वितैर्वा जुहुयाच्छ्रियासु चिरमेधते॥२७॥ शनिवारे तैलसिक्तैस्तिलैः शुद्धैस्तयैन्तरैः। १८१

हवनाल्लभते लक्ष्मीमह्वाद्दति मनोहराम्॥२८॥ तैः समस्तैः समस्तार्कैर्जुहुयात्सप्तसुक्रमात्॥ तद्दिने
रिंदिराह्वः स्याद्द्विघा हवनवै भवेत्॥२९॥ तन्नद्दिनेषु तद्द्विघा भक्तान्त्रीन्द्वौ सुभोजयेत्॥ घृतक्षीरसित
क्षौद्रगुडापूपसमन्वितैः॥३०॥ अश्विन्यादिषु ऋक्षेषु नवस्वपि हुनेत्क्रमात्॥ शालीनिस्तंडुलैर्मुद्गैर्माषैर्गो
रेनरैस्तिलैः॥३१॥ तथाविधैः सर्षपैश्च कोद्रवैरिंदिराप्तये॥ क्षौद्रसर्पिस्तिलदुग्धकेरोदेक्षुरसाप्लुतैः॥३२॥ म
हिष्यजाविकाक्षीरप्लुतैस्तैर्नवसुक्रमात्॥ मघादिषु तथा होमं नवभिः स्यान्नवस्वपि॥३३॥ चणकैश्चणका
न्नैश्च मुद्गान्नैः कृशरैस्तथा॥ माषान्नैश्च हरिद्रान्नैर्गुडान्नैः पायसैरपि॥३४॥ दुग्धान्नैश्च त्रिमधुक्तैः कीर्तिलक्ष्मी शुद्धा३पा॰
जयाप्तये॥ तथा मूलादिनवके नवभिर्जुहुयात्तथा॥३५॥ पृथुकैः सक्तुभिर्लाजैरिक्षुकांडैः पयःप्लुतैः॥ शा
लीचणकमुद्गोत्थैर्माषपिष्टतिलोद्भवैः॥३६॥ अपूपैर्मधुराभ्यक्तैर्विजयं कीर्तिमिंदिरां॥ आरोग्यमायुःसौभा

तं·ज यं मान्यतां बलमेद्ध्रुवं ॥ ३७ ॥ सिद्धयोगेषु यद्द्रव्यैर्जुहुयात्तत्समृद्धिमान् ॥ तथामृताख्ययोगेषु जुहुया
१८२ द्रोगशान्तये ॥ ३८ ॥ गुडूचीतिलदूर्वाभिस्त्रिमधुक्ताभिरादरात् ॥ उच्चयोगेषु जुहुयाद्रक्तोत्पलैः शु
भैः ॥ ३९ ॥ उद्योगो भवति सर्वेषां स्वकुलानां सुनिश्चितं ॥ पर्वताख्ये ऽह्नि योगे यद्द्रव्यैस्तद्धि पर्वतम् ॥ ४० ॥ भवे
दस्याचिरेणैव कालेन परमेश्वरि ॥ अथान्यमद्भुतं होममाकर्णय वदामि ते ॥ ४१ ॥ स्वक्षेत्रगे स्वोच्चगे वा जुहुया
